Departm[...]n in Mysore

S.S.L.C. EXAMINATION
1945

THE SANSKRIT TEXT

1,200 Copies

MYSORE:
PRINTED BY THE ASST. SUPDT. AT THE GOVT. BRANCH PRESS
1944

Price : Re. 0-6-0

॥ श्रीः ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

ಜೀವಕೋಟಿಗಳು ಬಹುಕಾಲದಿಂದ ಅಜ್ಞಾನಪಾಶದ ತೊಡಕಿಗೆ ಸಿಕ್ಕಿ ತಮ್ಮ ಜನ್ಮಸಾರ್ಥಕತೆಯ ಮೂಲವಾದ ಧ್ಯೇಯವನ್ನೇ ಮರೆತು, ಅವಿವೇಕದಿಂದ ಕೆಟ್ಟದ್ದನ್ನೇ ಹಿತವೆಂದು ನೆನೆದು, ಶ್ರಮಿಸಿ ನಾನಾಽನರ್ಥಗಳನ್ನೇ ಅನುಭವಿಸುತ್ತಿರುವರಷ್ಟೆ.

ಇಂತಹ ಅನರ್ಥ ಪರಂಪರೆಗೆ ಮೂಲಕಾರಣವಾದ ಅವಿವೇಕವನ್ನು ತೊಲಗಿಸುವ ಜ್ಞಾನವು ಗುರುವಿನಿಂದಲೇ ಲಭ್ಯವಾಗಬೇಕು.

ಭಗವನ್ತನೂ ಗೀತೆಯಲ್ಲಿ ಅರ್ಜುನನಿಗೆ—'**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ।**' ಎಂದು ಗುರುಮಹತ್ವವನ್ನು ಸೂಚಿಸಿರುವನು.

ಪ್ರಕೃತ

ಇಂತಹ ಜ್ಞಾನೋಪದೇಶಕ್ಕೆ ಪರಮಪ್ರಮಾಣವೆಂದು ಆಸ್ತಿಕರು ನಂಬಿರುವುದು ವೇದ—ತದ್ಭಾಗವಿಶೇಷವಾದ ಉಪನಿಷತ್ತುಗಳು.

ಆದುದರಿಂದಲೇ ಪರಮಾತ್ಮನೂ ಸಹ '**औपनिषद**' ನೆಂದು ಹೇಳಲ್ಪಟ್ಟಿರುವನು.

ಇಂತಹ ಅನೇಕ ಉಪನಿಷತ್ತುಗಳಲ್ಲಿ ಪೂರ್ವಾಚಾರ್ಯರು ಮುಖ್ಯವಾಗಿ ಆರಿಸಿರುವ ಹತ್ತು ಉಪನಿಷತ್ತುಗಳಲ್ಲಿ ಕಠೋಪನಿಷತ್ತೆಂಬುದೊಂದು.

ಇದರಲ್ಲಿ ಜನ್ಮಾನ್ತರಾರ್ಜಿತ ಸುಕೃತವಿಶೇಷದಿಂದ ವಿರಕ್ತಶಿಖಾಮಣಿಯೂ, ಸದ್ಗುಣಶೀಲನೂ ಆದ ನಚಿಕೇತಸ್ಸು ತನ್ನ ತಂದೆಯು ಆಚರಿಸಿದ ಯಾಗ ವಿಶೇಷದಲ್ಲಿ ಸರ್ವಸ್ವವನ್ನೂ ಸತ್ಪಾತ್ರದಲ್ಲಿ ವಿನಿಯೋಗಿಸಿ ಸಾರ್ಥಕಪಡಿಸಿದುದನ್ನು ಕಂಡು ತಾನೂ ಸದ್ವಿನಿಯೋಗ ಹೊಂದಿ, ತಂದೆಗೆ ಯಾಗದಿಂದ ವಿಶೇಷ ಫಲ ದೊರೆಕಿಸುವ ಕುತೂಹಲದಿಂದ ತಂದೆಯನ್ನು 2–3 ಆವರ್ತಿ ಕೇಳಲು 'ನಿನ್ನನ್ನು ಮೃತ್ಯುವಿಗೆ ಕೊಟ್ಟಿದ್ದೇನೆ'ಂದು ಹೇಳಲ್ಪಟ್ಟೊಡನೆ ಮುಂದಾಳಾಗಿ ಹೋಗುವೆನೆಂದು ತುಷ್ಟನಾಗಿ, ಮೂರ್ಖನಾದ ನನ್ನಿಂದ ಪೂರ್ಣಕಾಮನಾದ ಮೃತ್ಯುವಿಗೆ ಏನು ಪ್ರಯೋಜನವೆಂದು ಚಿಂತಿಸುತ್ತಾ ದುಡುಕಿದುದಕ್ಕೆ ಪಶ್ಚಾತ್ತಾಪಗೊಂಡ ತಂದೆಯನ್ನು ಸತ್ಯದಿಂದ ತಪ್ಪದಿರುವಂತೆ ಸಮಾಧಾನಪಡಿಸಿದನು.

ಹೊರಟು ಯಮಾತಿಥಿಯಾಗಿ ಸೇರಿ, ಸತ್ಕಾರಕ್ಕೆ ವಿಳಂಬಮಾಡಿದ ಪ್ರಯುಕ್ತ ಯಮನಿಂದ ಮೂರು ವರಗಳನ್ನು ವಿಹಿತವಾಗಿ ಹೊಂದಿದನು.

'**वक्ता चास्य त्वादृगन्यो न लभ्यः, नान्यो वरस्तुल्यः एतस्य कश्चित्**' ಹೀಗೆಂದು ದೃಢಚಿತ್ತದಿಂದಿರುವ ಶಿಷ್ಯನನ್ನು **विद्याभीप्सिनं नचिकेतसं मन्ये नत्वाकामा बहवो लोलुपन्त ॥ यान्त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ॥** ಎಂದು ಪರೀಕ್ಷಿಸಿ ಮೆಚ್ಚಿ ಸ್ವಯಂ ಮೃತ್ಯುವೂ ದಿವ್ಯ ಗುರುವಾಗಿ ಆತ್ಮತತ್ವವನ್ನು ತನ್ನ ಅಮೃತ ವಾಣಿಯಿಂದ ಉಪದೇಶಿಸಿರುವುದು, ಇದರ ಸಾರಾಂಶ. ಇದರಲ್ಲಿ ಆರಿಸಿದ ಕೆಲವು ಮಂತ್ರಗಳನ್ನು ಉದಾಹರಿಸಿರುತ್ತೆ. ಇವು ಸದಾ ಆಸ್ತಿಕರ ಅವಗಾಹನೆಯಲ್ಲಿರುವುದು ಪರಮ ಶ್ರೇಯಸ್ಕರವು.

न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥
अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः ॥
नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥
एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥
नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोन्यत्र कथं तदुपलभ्यते ? ॥
न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥
यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथमर्त्योऽमृतो भवत्येतावदनुशासनम् ॥

रघुवंश

ಕಾಳಿದಾಸ ಮಹಾಕವಿಯ ಗ್ರಂಥಗಳಲ್ಲಿ ರಘುವಂಶ ಕಾವ್ಯವು ಒಂದು. ಅತ್ಯಂತ ಪ್ರಸಿದ್ಧನಾದ ರಘು ಚಕ್ರವರ್ತಿಯ ವಂಶದ ರಾಜರುಗಳ ಚರಿತ್ರೆಗಳನ್ನು ಹೇಳುವುದರಿಂದ ಇದಕ್ಕೆ ರಘುವಂಶವೆಂಬ ಹೆಸರಾಯಿತು.

ಕಾಳಿದಾಸನು ಜಗದ್ವಿಖ್ಯಾತಕವಿ. ಪಾಶ್ಚಾತ್ಯ, ಪ್ರಾಚ್ಯ ಪಂಡಿತರೆಲ್ಲರೂ ಈತನನ್ನು ಅಪ್ರತಿಮ ಕವಿಯೆಂದು ಕೊಂಡಾಡಿರುತ್ತಾರೆ. ಈತನ ಜೀವನ ಚರಿತ್ರೆಯನ್ನು ಕುರಿತು ಕರ್ಣಪರಂಪರೆಯಾಗಿ ಬಂದಿರುವ ವಿವರಗಳು ಅನೇಕವುಂಟು. ಆದರೆ ನಿಶ್ಚಯವಾಗಿ ಇದೇ ಎಂಬುದಾಗಿ ಹೇಳುವವರಿಲ್ಲ. ಈತನ ಜೀವನ ವಿಚಾರವಾಗಿ ಇಷ್ಟು ಹೇಳಬಹುದಾಗಿದೆ. ಕಾಳಿದಾಸನು ವಿಕ್ರಮಾದಿತ್ಯ ಚಕ್ರವರ್ತಿಯ ಆಸ್ಥಾನದಲ್ಲಿ ವಿರಾಜಿಸುತ್ತಿದ್ದ 'ನವಮಣಿ' ಗಳಲ್ಲಿ ಅಗ್ರಗಣ್ಯನು. ತನ್ನ ಜೀವಮಾನದಲ್ಲಿಯೇ ಕೀರ್ತಿಯನ್ನು ಗಳಿಸಿದವನು. ವೇದ, ಉಪನಿಷತ್ತುಗಳು, ಭಗವದ್ಗೀತೆ, ಶಾಸ್ತ್ರಗಳು, ವೈದ್ಯಶಾಸ್ತ್ರ, ಮತ್ತು ಖಗೋಳಶಾಸ್ತ್ರಗಳಲ್ಲಿ ಇವನಿಗೆ ಪರಿಶ್ರಮವಿದ್ದಿತು. ಈತನ ಮತ ಶೈವ, ಇತರ ಮತಗಳಲ್ಲಿ ದ್ವೇಷವಿರಲಿಲ್ಲ. ಲಕ್ಷ್ಮೀಪುತ್ರನಾಗಿಯೇ ಬಾಳುತ್ತಿದ್ದನು. ಹಿಂದುಸ್ಥಾನವನ್ನು ಚೆನ್ನಾಗಿ ಬಲ್ಲನು. ಜೀವನದಲ್ಲಿ ಮಾಧುರ್ಯವನ್ನು ಅನುಭವಿಸಿ ಅದರ ಅನರ್ಘತೆಯನ್ನು ತನ್ನ ಕಾವ್ಯಗಳಲ್ಲಿ ಕೋಮಲವಾದ ರೀತಿಯಲ್ಲಿ ಪ್ರಕಾಶಪಡಿಸಿದ್ದಾನೆ.

ಕಾಳಿದಾಸನ ಕಾಲವನ್ನು ಕುರಿತು ಭಿನ್ನಾಭಿಪ್ರಾಯಗಳಿರುವುವು. ಕೆಲವರು ಈತನು ಕ್ರಿ. ಪೂ. ಮೊದಲನೆಯ ಶತಮಾನದವನೆಂದೂ, ಮತ್ತೆ ಕೆಲವರು ಕ್ರಿ. ಶ. ಐದನೆಯ ಶತಮಾನದವನೆಂದೂ ಹೇಳುವರು. ವಿಕ್ರಮಾದಿತ್ಯ ಚಕ್ರವರ್ತಿಯೂ ಇತಿಹಾಸದಲ್ಲಿ ಒಬ್ಬನೇ ಅಲ್ಲ. ಆದುದರಿಂದ ಅವನ ಕಾಲವನ್ನೂ ನಿರ್ಧರವಾಗಿ ಹೇಳುವಂತಿಲ್ಲ. ಸಾಮಾನ್ಯವಾಗಿ ಈಗಿನ ಪಂಡಿತರ ಅಭಿಪ್ರಾಯದಂತೆ ಕಾಳಿದಾಸನನ್ನು ನಾಲ್ಕನೆಯ ಶತಮಾನದವನೆನ್ನಬಹುದು.

ಕಾಳಿದಾಸನ ಶೈಲಿಯು ಸರಳವೂ ಮನೋಹರವೂ ಆದುದು. ಪ್ರಕೃತಿಸೌಂದರ್ಯ ವರ್ಣನೆಯಲ್ಲಿ ಈತನು ಅದ್ವಿತೀಯನು. '**उपमा कालिदासस्य**' ಎಂಬುದಾಗಿ ಕಾಳಿದಾಸನು ಉಪಮಾಲಂಕಾರದಿಂದ ಸುಪ್ರಸಿದ್ಧನಾಗಿರುವನು.

ಕಾಳಿದಾಸನ ಮುಖ್ಯ ಗ್ರಂಥಗಳು :—

(1) ಶಾಕುಂತಲ (2) ವಿಕ್ರಮೋರ್ವಶೀಯ (3) ಮಾಳವಿಕಾಗ್ನಿಮಿತ್ರ (4) ರಘುವಂಶ (5) ಕುಮಾರಸಂಭವ (6) ಮೇಘದೂತ (7) ಋತುಸಂಹಾರ.

रघुवंशे

अजनृपस्वयंवरप्रस्थानम्

तमध्वरे विश्व[1]जिति क्षितीशं
निश्शेषविश्राणितकोशजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १

स मृण्म[2]ये वीतहिर[3]ण्मयत्वात्
पात्रे निधाया[4]र्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथे[5]यः ॥ २

तमर्चयित्वा विधिव[6a]द्विधिज्ञः
तपोधनं[6b] मान[6c]धनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात्
कृताञ्जलिः कृत्यविदित्युवाच ॥ ३

अप्यग्र[7a]णीर्मन्त्रकृ[7b]तामृषीणां
कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं
लोकेन चैतन्यमिवोष्णरश्मेः ॥ ४

कायेन वाचा मनसापि शश्वत्
यत्सम्भृतं वासवधैर्यलो[8]पि ।
आपाद्यते न व्ययमन्तरायैः
[9] कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥ ५

आधारबन्धप्रमुखैः प्रयत्नैः
संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः
श्रमाच्छि[10]दामाश्रमपादपानाम् ॥ ६

क्रियानिमित्तेष्वपि वत्सलत्वात्
अभग्नकामा मुनिभिः कुशेषु ।
तदङ्क[11]शय्याच्युतनाभि नाला
कच्चिन्मृगीणामन[12]घा प्रसूतिः ॥ ७

निर्वर्त्यते यैर्नियमाभिषेकः
येभ्यो निवापाञ्जलयः पितॄणाम् ।
तान्युञ्छ[13]षष्ठाङ्कितसैकतानि
शिवानि वस्तीर्थजलानि कच्चित् ॥ ८

नीवारपाकादिकडङ्ग[14]रीयैः
आमृश्यते जान[15]पदैर्न कच्चित् ।
कालोपपन्नातिथिकल्प्य भागं
वन्यं शरीरस्थिति[16]साधनं वः ॥ ९

अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहा[17]य ।
कालो ह्ययं सङ्क्रमितुं द्वितीयं
सर्वोपकार[18]क्षममाश्रमं ते ॥ १०

तवार्हतो नाभिगमेन तृप्तं
मनो नियोगक्रि[19]ययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा
प्राप्तोऽसि सम्भावयितुं वनान्माम् ॥ ११

इत्यर्घ्यपात्रानुमितव्ययस्य
रघोरुदारामपि गां निशम्य ।
स्वार्थोपपत्तिं प्रति दुर्बलाशः
तमित्यवोचद्वरतन्तुशिष्यः ॥ १२

सर्वत्र नो वा[20]र्तमवे[21]हि राजन्
नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ॥ १३

भक्तिः प्रती[22]क्ष्येषु कुलोचिता ते
पूर्वान्महाभाग तयातिशेषे[23] ।
व्यतीतकालस्त्वहमभ्युपेतः
त्वामर्थिभावादिति मे विषादः ॥ १४

शरीरमात्रेण नरेन्द्र तिष्ठन्
आभासि तीर्थप्रतिपादि[24]तर्द्धिः ।
आर[25]ण्यकोपात्तफलप्रसूतिः
[26]स्तम्बेन नीवार इवावशिष्टः ॥ १५

[27]स्थाने भवानेकनराधिपस्सन्
अकि[28]ञ्चनत्वं मखजं व्यनक्ति[29a] ।
प[29b]र्यायपीतस्य सुरैर्हिमांशोः
कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥ १६

तदन्यतस्तावदनन्यकार्यः
गुर्वर्थमाहर्तुमहं यतिष्ये ।
[30]स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं
शरद्घनं ना[31]र्दति चातकोऽपि ॥ १७

एतावदुक्त्वा प्रतियातु[32]कामं
शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन् गुरवे प्रदेयं
त्वया कि[33]यद्वेति तमन्वयुङ्क्त[34a] ॥ १८

ततो यथावद्विहिताध्वराय
तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स [34b]वर्णी
विचक्षणः प्रस्तुतमाचचक्षे ॥ १९

समाप्तविद्येन मया महर्षिः
विज्ञापितोऽभूद्गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां
तां भक्तिमेवागणयत्पुरस्तात् ॥ २०

निर्बन्धसञ्जातरुषार्थकार्श्य-
मचिन्तयित्वा गुरुणाहमुक्तः ।
वित्तस्य विद्या[35]परिसंख्यया मे
कोटीश्चतस्रो[36] दश चाहरेति ॥ २१

सोऽहं सपर्याविधिभाजनेन
मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे सम्प्रति नोपरोद्धुं
अल्पेतरत्वाच्छ्रुत[37]निष्क्रयस्य ॥ २२

इत्थं द्विजेन द्विजराजकान्ति-
रावेदितो वेदविदां वरेण ।
एनो[38]निवृत्तेन्द्रियवृत्तिरेनं
जगाद भूयो जगदेकनाथः ॥ २३

गुर्वर्थमर्थी श्रुतपारदृ[39]श्वा
रघोः सकाशादनवाप्य कामम् ।
गतो वदान्या[40]न्तरमित्ययं मे
मा [41] भूत्परीवादनवावतारः ॥ २४

स त्वं प्रशस्ते महिते मदीये
वसंश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्रा[42]ण्यहान्यर्हसि सोढुमर्ह-
न्यावद्यते साधयितुं त्वदर्थम् ॥ २५

तथेति तस्याऽवितथं प्रतीतः
प्रत्य[43]ग्रहीत्सङ्गरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य
निष्क्रष्टुमर्थं चकमे कुबेरात् ॥ २६

वसिष्ठमन्त्रोक्षणजप्रभावात्
उदन्वदाकाशमहीधरेषु ।
मरु[44]त्सखस्येव बलाहकस्य
गतिर्विजघ्ने न हि तद्रथस्य ॥ २७

अथाधिशिश्ये[45] प्रयतः प्रदोषे
रथं रघुः कल्पितशस्त्रगर्भम् ।
सामन्तसम्भावनयैव धीरः
कैलासनाथं तरसा जिगी[46]षुः ॥ २८

प्रातः प्रयाणाभिमुखाय तस्मै
सविस्मयाः कोशगृहे नियुक्ताः ।
हिरण्मयीं कोशगृहस्य मध्ये
वृष्टिं शशंसुः पतितां नभस्तः ॥ २९

तं भूपतिर्भासुरहेमराशिं
लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नम् ॥ ३०

जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतामभिनन्द्य सत्वौ ।
गुरुप्रदेयाधिकनिस्पृहोऽर्थी
नृपोऽर्थिकामादधिकप्रदश्च ॥ ३१

अथोष्ट्रवामीशतवाहितार्थं
प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन् करेणानतपूर्वकायं
सम्प्रस्थितो वाचमुवाच कौत्सः ॥ ३२

किमत्र चित्रं यदि [47] कामसूर्भूः
वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावः
मनीषितं द्यौरपि येन [48]दुग्धा ॥ ३३

आशास्यमन्यत्पुनरुक्तभूतं
श्रेयांसि सर्वाण्यधि [49] जग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं
भवन्तमीड्यं भवतः पितेव ॥ ३४

इत्थं प्रयुज्याशिषमग्रजन्मा
राज्ञे [50] प्रतीयाय गुरोः सकाशम् ।
राजापि लेभे सुतमाशु तस्मात्
आलोकमर्कादिव जीवलोकः ॥ ३५

[51] ब्राह्मे मुहूर्ते किल तस्य देवी
कुमार[52]कल्पं सुषुवे कुमारम् ।
अतः पिता ब्रह्मण एव नाम्ना
तमात्मजन्मानमजं चकार ॥ ३६

रूपं तदोजस्वि तदेव वीर्यं
तदेव [53] नैसर्गिकमुन्नतत्वम् ।
न कारणात्स्वा[54]द्बिभिदे कुमारः
प्रवर्तितो दीप इव प्रदीपात् ॥ ३७

उपात्तविद्यं विधिवद्गुरुभ्यः
तं यौवनोद्भेदविशेषकान्तम् ।
श्रीः साभिलाषापि गुरोरनुज्ञां
धीरेव कन्या पितुराचकांक्ष ॥ ३८

अथेश्वरेण क्रथ[55]कैशिकानां
स्वयंवरार्थं [56] स्वसुरिन्दुमत्याः ।
आप्तःकुमारानयनोत्सुकेन
भोजेन दूतो रघवे विसृष्टः ॥ ३९

तं श्लाघ्यसम्बन्धमसौ विचिन्त्य
दारक्रियायोग्यदशं च पुत्रम् ।
प्रस्थापयामास ससैन्यमेन-
मृद्धां विदर्भाधिप[57]राजधानीम् ॥ ४०

तस्योपकार्या रचितोपचारा
[58] वन्येतरा [59] जानपदोपदाभिः
मार्गे निवासा मनुजेन्द्रसूनोः
बभूवुरुद्यान[60]विहारकल्पाः ॥ ४१

स नर्मदारोधसि शीकरार्द्रैः
मरुद्भिरानर्तितनक्तमाले।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतुसैन्यम् ॥ ४२

अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः
प्राक्सूचितान्तस्सलिलप्रवेशः।
निर्धौत[61a]दानामलगण्डभित्तिः
वन्यः [61b]सरित्तो गज उन्ममज्ज ॥ ४३

निःशेषविक्षालितधातुनापि
[62] वप्रक्रियामृक्षवतस्तटेषु।
नीलोर्ध्वरेखाशबलेन शंसन्
दन्तद्वयेनाश्मविकुण्ठितेन ॥ ४४

संहारविक्षेपलघुक्रियेण
हस्तेन तीराभिमुखस्सशब्दम्।
बभौ स भिन्दन् बृहतस्तरङ्गान्
[63] वार्यर्गलाभङ्ग इव प्रवृत्तः ॥ ४५

शैलोपमश्शैवलमञ्जरीणां
जालानि कर्षन्नुरसा स पश्चात्।
पूर्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥ ४६

तस्यैकनागस्य कपोलभित्त्योः
जलावगाहक्षणमात्रशान्ता।
वन्येतरानेकपदर्शनेन
पुनर्दिदीपे मददुर्दि[64]नश्रीः ॥ ४७

[65] सप्तच्छदक्षीरकटुप्रवाह-
मसह्यमाघ्राय मदं तदीयम्।
विलङ्घिताधोरणतीव्रयत्नाः
सेना गजेन्द्रा विमुखा बभूवुः ॥ ४८

स छिन्न[66]बन्धद्रुतयुग्यशून्यं
[67] भग्नाक्षपर्यस्तरथं क्षणेन ।
रामापरित्राण[68]विहस्तयोधं
सेनानिवेशं तुमुलं चकार ॥ ४९

तमापतन्तं नृपते[69]रवध्यः
वन्यः करीति श्रुतवान् कुमारः !
निवर्तयिष्यन् विशिखेन कुम्भे
जघान नात्यायतकृष्टशार्ङ्गः ॥ ५०

स विद्धमात्रः किल नागरूप-
मुत्सृज्य तद्विस्मितसैन्यदृष्टः ।
स्फुरत्प्रभामण्डलमध्यवर्ती
कान्तं वपुर्व्योमचरं प्रपेदे ॥ ५१

अथ [70] प्रभावोपनतैः कुमारं
कल्पद्रुमोत्थैरवकीर्य पुष्पैः ।
उवाच [71a] वाग्मी दशनप्रभाभिः
संवर्धितोरस्थलतारहारः ॥ ५२

मतङ्गशापादवलेपमूला-
दवाप्तवानस्मि मतङ्गजत्वम् ।
अवेहि गन्धर्वपतेस्तनूजं
[71b] प्रियंवदं मां प्रियदर्शनस्य ॥ ५३

स चानुनीतः प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत् ।
उष्णत्वमग्न्यातपसम्प्रयोगात्
शैत्यं हि यत्सा प्रकृतिर्जलस्य ॥ ५४

इक्ष्वाकुवंशप्रभवो यदा ते
भेत्स्यत्यजः कुम्भमयोमुखेन ।
संयोक्ष्यसे स्वेन वपुर्महिम्ना
तदेत्यवोचत्स तपोनिधिर्माम् ॥ ५५

सम्मोचितस्सत्ववता त्वयाऽहं
शापाच्चिरप्रार्थितदर्शनेन।
प्रतिप्रियं चेद्भवतो न कुर्यां
वृथा हि मे स्यात्स्वपदोपलब्धिः॥ ५६

संमोहनं नाम सखे ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम्।
[72]गान्धर्व[73]मादत्स्व यतः प्रयोक्तुः
न चारिहिंसा विजयश्च हस्ते॥ ५७

अलं[74] ह्रिया मां प्रति यन्मुहूर्तं
दयापरोऽभूः प्रहरन्नपि त्वम्।
तस्मादुपच्छन्दयति प्रयोज्यं
मयि त्वया न प्रतिषेधरौक्ष्यम्॥ ५८

तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सरितो नृसोमः।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं
जग्राह तस्मान्निगृहीतशापात्॥ ५९

एवं तयोरध्वनि दैवयोगात्
आसे[75]दुषोः सख्यमचिन्त्यहेतु।
एको ययौ चैत्ररथप्रदेशान्
सौरा[76]ज्यरम्यानपरो विदर्भान्॥ ६०

तं तस्थिवांसं नगरोपकण्ठे
तदागमारूढगुरुप्रहर्षः।
प्रत्युज्जगाम क्रथकैशिकेन्द्रः
चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली॥ ६१

प्रवेश्य चैनं पुरमग्रयायी
नीचैस्तथोपाचरदर्पित[77]श्रीः।
मेने यथा तत्र जनः समेतः
वैदर्भमागन्तुमजं गृहेशम्॥ ६२

तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां
प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् ।
रम्यां रघुप्रतिनिधिः स नवोपकार्यां
बाल्यात्परामिव [78] दशां मदनोऽध्युवास ॥ ६३

तत्र स्वयंवरसमाहृतराजलोकं
कन्या[79]ललामकमनीयमजस्य लिप्सोः[80] ।
भावावबोध[81]कलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव ॥ ६४

तं कर्णभूषणनिपीडितपीवरांसं
शय्योत्तरच्छदविमर्दकृशाङ्गरागम् ।
सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥ ६५

रात्रिर्गता मतिमतां वर मुञ्च शय्यां
धात्रा द्वि[82]धैव ननु धूर्जगतो विभक्ता ।
तामेकत स्तव बि[83]भर्ति गुरुर्विनिद्रः
तस्या भवानपरधुर्य[84]पदावलम्बी ॥ ६६

निद्रावशेन भवता[85]प्यनवेक्षमाणा
पर्युत्सुकत्वमबला निशि खण्डि[86]तेव ।
लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विज[87]हाति चन्द्रः ॥ ६७

तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्तः
चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥ ६८

वृन्ताच्छ्लथं हरति पुष्पमनोकहानां
संसृज्यते सरसिजैररुणांशुभिन्नैः ।
स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥ ६९

ताम्रोदरेषु पतितं तरुपल्लवेषु
निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपर[88]भागतया[89]धरोष्ठे
लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥ ७०

यावत्प्रतापनिधिरा[90]क्रमते न भानुः
अह्वाय तावदरुणेन तमो निरस्तम् ।
आयोधनाग्रसरतां त्वयि वीर ! याते
किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति[91] ॥ ७१

शय्यां जहत्युभय[92a]पक्षविनीतनिद्राः
स्तम्बेरमा मुखरशृङ्ख[92b]लकर्षिणस्ते ।
येषां विभान्ति तरुणारुणरागयोगात्
भिन्नाद्रि[93]गैरिकतटा इव दन्तकोशाः ॥ ७२

दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्षवनायुदेश्याः ।
वक्त्रोष्मणा मलि[94]नयन्ति पुरो गतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥ ७३

भवति विरल[95]भक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।
अयमपि च गिरं न स्त्वत्प्रबोधप्रयुक्तां
अनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः ॥ ७४

इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झां चकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं [96]सुप्रतीकः ॥ ७५

अथ विधिमवसाय्य शास्त्रदृष्टं
दिवससुखोचितमञ्चिताक्षिपक्ष्मा ।
कुशलविरचितानुकूलवेषः
क्षितिपसमाज[97]मगात् स्वयंवरस्थम् ॥ ७६

———

श्रीकृष्णचरिते

भगवतो जन्म बाललीला वृत्तान्तः

[तदात्मानं सृजाम्यहम्]

सोमवंशे शूरो नाम [1]सात्वतो बभूव । तस्य मारिषा नाम पत्न्यभवत् । तस्यां चासौ वसुदेवपूर्वान्दश पुत्रानजनयत् । वसुदेवस्य जातमात्रस्यैवैतद्गृहे भगवदंशावतारमव्याहतदृष्ट्या पश्यद्भिर्देवैः दिव्या आनकदुन्दुभयो वादिताः । ततस्तदैवासावानकदुन्दुभिसंज्ञामवाप । उग्रसेनाग्रजस्य देवकस्य देवकीं नाम तनयां स उपयेमे । विवाहसमये वररथमुग्रसेनात्मजो भोजाधिपः कंसः स्वयं सारथिर्भूत्वा नुनोद । तत्कालेऽ[2]शरीरिणी वागुदचरत्—"मूढ ! यामिमां [3]भर्त्रा सह रथे स्थितां देवकीं वहसि, तस्या अष्टमो गर्भस्ते [4]प्राणानपहरिष्यति" इति ॥

तदाकर्ण्य [5]वज्रपाताहत इव नष्टचेतनोऽस्तमितविवेको विस्मृतबान्धवस्नेहः कंसः कृपाणपाणिर्देवकीं प्रत्यधावत् । "महाबाहो! भवतेयमात्म[6]स्वसा न हन्तव्या । सकलानप्यस्या गर्भांस्तुभ्यमहं समर्पयिष्ये" इति वसुदेववचनगौरवात् कंसो देवकीं न [7]जघान ॥

एतस्मिन्नन्तरे भूरि[8]भारावपीडिता देवी धरित्री मेरुगते त्रिदिवौकसां [9]समाजे गत्वा प्रणिपत्य च साश्रुपातं करुणार्थग्रथितामात्मदशां तेभ्यः कथयामास । "सुरोत्तमाः, साम्प्रतमिमे दैत्याः मां समाक्रम्या[10]हर्निशं प्रजा बाधन्ते, भगवता विष्णुना हतपूर्वः कालनेमिर्महासुरोऽधुना कंसो भूत्वा दौरात्म्येन मम हृदयमर्म [11]छिनत्ति, अन्येऽप्यरि-

ष्टादयोऽसंख्याता दुरात्मनो नृशंसैराचारैः मां पीडयितुं बद्धपरिकरा वर्तन्ते । अमरेश्वराः, प्रसादं कुरुत, पङ्के [11] गौरिवावसीदामि । किं करोमि ? भवन्त एव शरणमेता विज्ञापयामि । नातःपरमात्मानं बिभर्तु[12]मलम्, महाभागाः, तथाकर्तुमर्हथ यथा नाहं रसातलं गच्छेयम् ” इति ॥

एतच्छ्रुत्वा त्रिदशैः प्रचोदितो ब्रह्मा “ सर्वात्मानं [13] जगन्मयं भुवो भारा[14]वतारणार्थं शरणं याम, येन स आत्मांशेन अवतीर्य पृथ्वीपालनाय धर्म[15a]स्थितिं करिष्यति ” इत्युक्त्वा देवैः सह क्षीराब्धितटं गत्वा समाहितमना भगवन्तं गरुडध्वजं [15b] श्रुत्यर्थगर्भितेन स्तोत्रेण तुष्टाव । प्रीतात्मा विश्वरूपधरो हरिर्ब्रह्माणमाह—“ चतुरानन भद्रं ते ? तव भक्त्या स्तोत्रेण च प्रसन्नोऽस्मि, सर्वमहं [16] जानामि, अचिरादेवैषा भूतधात्री सकलदुःखविनिर्मुक्ता भविष्यति, इमौ मे [17a] सितकृष्णौ केशौ वसुधातलेऽवतीर्य भुवो भारक्लेशं हरिष्यतः, सुरास्तावत् प्रथमं महीतले स्वांशैरवतीर्य उन्मत्तै[17b]र्महासुरैः युद्धं कुर्वन्तु, [18] मद्दृक्पातचूर्णिता अशेषा अपि दैतेयाः निःसन्देहं क्षयं यास्यन्ति, अयं मे कृष्णः केशो वसुदेवपत्न्यां देवक्यामष्टमो गर्भो भविता, स एव कंसमन्तं[19] गमयिता ” इति ॥

एवं भगवद्वचनमाकर्ण्य हर्षोत्फुल्लनयनाः ब्रह्मपुरोगमाः सुरा [20] मेरुपृष्ठमा[21]जग्मुः । अखिलमेनं वृत्तान्तं नारदो मुनिः कंसमाचचक्षे । तदुपश्रुत्य कुपितः कंसो देवकीं वसुदेवं च गृहे गुप्तावधारयत् । यथा [22] प्रतिज्ञातं वसुदेवोऽपि जातं जातं पुत्रं कंसाय समर्पयति । तं तं च कंसो विनाशयति । एवं [23a] षट्पुत्रास्तेनमारिताः । सर्वेप्येते विष्णुप्रयुक्तया योगनिद्रया देवकीगर्भे स्थापिताः हिरण्यकशिपोः पुत्रा आसन् । हतेषु तेषु भगवतः शेषाख्योंऽशो देवक्यामंशांशेन गर्भत्वमाप । तं गर्भं विष्णुनादिष्टा योगनिद्रा संकृष्य रोहिण्यां नामान्यस्यां वसुदेवस्य भार्यायां

निवेशयामास। ततो भगवान् हरिर्लोकत्रयोपकाराय देवक्या गर्भं प्रविवेश। योगनिद्रापि विष्णुसमादिष्टा तस्मिन्नेव दिने यशोदाया गर्भे संबभूव। अस्मि[23b]न्मङ्गलावसरे दिवि ग्रहगणः सम्यक् प्रचचार। ऋतवः स्वस्वलिङ्गैर्दिश आनन्दमयीश्चक्रुः। आपन्न[24]सत्त्वां भगवतीं देवकीमतितेजस्वितया न कश्चिदपि द्रष्टुं[25] शशाक। स्त्रीपुरुषैरदृष्टा देवगणा वपुषा विष्णुं बिभ्राणां तां सहर्षं सादरं च[26] तुष्टुवुः। अथाच्युतभानुनाऽखिलजगत्पद्मबोधाय देवकीपूर्वसन्ध्यायामाविर्भूतम्। तज्जन्मदिनं शशिनः कौमुदीवाह्लाद्यमलदिङ्मुखं बभूव। जायमाने जनार्दने सन्तः समधिकं सन्तोषं, चण्डमारुतः प्रशमं, निम्नगाश्च प्रसादं सममेव ययुः। सिन्धवश्च जलनिनादेन मनोहरं वाद्यं[27] चक्रुः। गन्धर्वपतयश्च ललितं जगुः। अप्सरोगणाश्च ननृतुः। देवाश्च पुष्पवर्षाणि ववर्षुः। अग्नयश्च शान्ताः जज्वलुः। जलदाश्च मन्दं जगर्जुः॥

आनकदुन्दुभिश्च फुल्लेन्दीवरपत्राभं[28] श्रीवत्सवक्षसं चतुर्बाहुं तमुदीक्ष्य प्रसन्नाभिर्वाग्भिरभिष्टूय[29] कंसाद्भीतो विज्ञापयामास—

"भगवन्, शङ्खचक्रगदाधर, ज्ञातोऽसि। प्रसादेन दिव्यमिदं रूपमुपसंहर; अन्यथायं दुरात्मा कंसोऽद्यैव मम मन्दिरे त्वामवतीर्णं ज्ञात्वा मम यातनां करिष्यति" इति॥

एवमेव वात्सल्यवती देवक्यपि तं तद्रूपमुपसंहर्तुं प्रार्थयामास॥

पुत्रार्थिन्या त्वया पूर्वं स्तुतोऽधुना तव पुत्रो जातः इति तामुक्तवन्तं धृतबालरूपं कृष्णं कंसत्रस्तः पुत्रवात्सल्यप्रेरितो वसुदेवः रात्रावेवादाय ततो निर्जगाम। व्रजति तस्मिन् सर्वेऽपि रक्षिणो मधुरा द्वारपालाश्च योगनिद्रया मोहिता बभूवुः। अत्युल्बणं[30] वर्षति जलदसमुदाये शेषः फणेन तमाच्छादयामास। [31]नानावर्तसमाकुलाप्यतिगम्भीरापि यमुना कृष्णेन सहातिक्रमति वसुदेवे जानुद[32]घ्नजला वहति[33] स्म। वार्षिकं करमादाय प्रतितटमागतान्नन्दादीन्गोपवृद्धान्वसुदेवो ददर्श। तस्मिन्नेव

काले यशोदापि योगनिद्रां कन्यां सुषुवे। योगनिद्रया किल मोहवशं नीतेऽखिलजने दारिकास्थाने स्वतनयं स्थापयित्वा तां चादाय वसुदेवः प्रत्याजगाम ॥

ततो रक्षिणो देवकीशयने बालध्वनिं श्रुत्वा सहसोत्थिताः। सत्वरं देवकीप्रसवं कंसायावेदयामासुः। तूर्णमुपेत्य मुञ्च मुञ्चेति सन्न[34]कण्ठया-देवक्या निवारितोऽपि कंसः प्रसभं बालिकां गृहीत्वा शिलापृष्ठे चिक्षेप। एवं क्षिप्ता सा वियति[35] कृतपदा सायुधाष्टमहाभुजा सरोषं कंसम[36a]ब्रवीत् "मूढ, किं मया क्षिप्तया? जात एव तव मृत्युः । आशु [36b] सम्प्रधार्यात्मनो हितं क्रियता"मिति। एवमुक्त्वा स पश्यतो भोजरा[37]जस्य दर्शन[38]पथादन्तर्हिता ॥

अथ कंस [39] उद्विग्नमना भूत्वा प्रलम्बादीन्महासुरानाहूय तैः साकं मन्त्रयांचक्रे । "असुरपुंगवाः, मद्वीर्यतापितैरमरैर्मां हन्तुं यद्यपि यत्नः कृतः तथापि एतां [40]स्तृणाय मन्ये, किमल्पवीर्येणेन्द्रेण, किं तपस्विना हरेण, [41]किंछिद्रेष्वसुरघातिना हरिणा?

यदा शक्रेण मद्राष्ट्रे वृष्टिर्वारिता तदा मदीयबाणानिर्भिन्नैर्जलमुग्भिर्जलं किं न मुक्तम् मद्गुरोर्जरासन्धादृते[42a] सर्वेऽप्यवनीपालाः किं सन्नतिं न याता सर्वथा मेऽमरेष्ववज्ञा[42b] । तेषु यत्नपरेष्वपि मे हास्यं जायते । तथापि दुरात्मनां तेषामपकाराय अस्माभिर्यतनीयम् । तत्पृथिव्यां ये केचित् [43]धर्मपरायणाः, ये केचिच्च यज्विनः[44] सन्ति, देवापकाराय तेषां सर्वात्मना वधः कार्यः । विशेषतस्तू[45]द्रिक्तबलानां बालानां वधे परमो यत्नः कर्तव्यः "इति ॥

ततः कंसो देवकीं वसुदेवं च निरोधतः मुमोच । वृथैव मया युवयोरर्भका निहताः। अन्य एव कोऽपि मम नाशाय बालः समुद्भूतः ? अलं परितापेन । यद्भावि तत् अन्यथा न भवति । अथ वायुषोऽन्ते को वा न विहन्यते? इति चाश्वासयामास ॥

बाललीला

[लोकवत्तु लीलाकैवल्यम्]

विमुक्तो वसुदेवः पुत्रानिष्टमाशङ्कमानः पुत्रवात्सल्येन प्रेर्यमाणश्च नन्दस्य शकटं समुपेत्य ‘ दिष्ट्या[1] वर्धसे वार्धके पुत्ररत्नलाभेन ’ इति सादरमभिनन्द्य च तमुवाच—“ भद्र, नृपतेर्वार्षिकः सर्वः करो दत्तः । यदर्थं सर्वे यूयमागतास्तत्कार्यं निष्पन्नम् । तत् किं स्थीयते ? शीघ्रं निजगोकुलं [2]गम्यताम् । [3]वक्तुमयुक्तमपि किंचिदुच्यते—तत्र मे रोहिणी[4]-प्रसवो बालको वर्तते, स अत्मतनयवद्रक्षणीयः ” इति ॥

एवं संबोधिता नन्दपुरोगमा गोपाः शकटारोपितैर्भाण्डैर्गोकुलं जग्मुः । तत्र क्षेमेण निव[5]सतां तेषां कंसप्रेरिता पूतना मूर्तिमती कालरात्री रात्रौ विषमयस्तनदानेन बालकान् हन्तुं प्राप । मुखनिवेशितस्तनः कृष्णः सकोपं तस्याः स्तनं कराभ्यां गाढमवपीड्य प्राणसहितं पपौ । विमुक्तमहारावाविच्छिन्न[6]स्नायुबन्धना पूतना तत्क्षणान्ममार । तन्नादश्रुति[7]विह्वलाः प्रबुद्धाः व्रजौकसः[8] ससम्भ्रममागत्य अतिभीषणमृतपूतनोत्सङ्गे क्रीडन्तं कृष्णं [9]ददृशुः । प्रवेपमानहृदया कृष्णैकनिष्ठनयना निरस्तभीत्यादिविकारा यशोदा सहसैव कृष्णं हस्ताभ्यामुज्जहार । दृढं च तं स्नेहैकमूर्तिरामीलितलोचना हृदयेन परिषस्वजे । अनन्तरमनन्तरान्गोपादीन्ददर्श । ‘ प्रतिहत[10]ममङ्गलं ’ इत्युक्त्वा सा कृष्णे गोपुच्छभ्रामणेन बाल[11]दोषमपाकरोत् । नन्दगोऽपोऽपि गोकरी[12]षमुपादाय ‘ हरिस्त्वां रक्षतु ’ ‘ केशवस्त्वां रक्षतु ’ ‘ महीधरस्त्वां रक्षतु ’ इति रक्षां चकार ॥

कदाचिच्छकटस्याधस्ताच्छयानः कृष्णः स्तन्यार्थी प्ररुदन् पादावूर्ध्वं चिक्षेप । तस्य पादप्रहारेण सकलमपि शकटं परिववृते । सर्वाणि च कुम्भभाण्डादीनि विपरीतानि भूत्वा ध्वंसमवापुः । तदा गोपेषु गोपीषु च हाहाकारो महानभूत् । गोपा आगत्यो[13]त्तानशायिनं बालं

ददृशुः । केन केनेदं शकटं परिवर्तितम् ? इति पप्रच्छुः । बाला ऊचुः— ‘अनेन कृष्णेन शकटं पातित’मिति । तदा तेऽतीव विस्मिता बभूवुः । यशोदा च शकटं तदारूढभग्नभाण्डकपालिकाश्च दधिपुष्पफलाक्षतैः अर्चयामास ॥

अथ वसुदेवप्रणोदितो गर्गः प्रच्छन्न एव गोकुले रामकृष्णयोः सं[14]स्कारानकरोत् । स्वल्पेन कालेन तावुभौ घृष्टजानु[15]करौ रिङ्गिणौ बभूवतुः । करीषभस्मदिग्धाङ्गावितस्ततो भ्राम्यन्तौ निवारयितुं न यशोदा नापि रोहिणी शशाक । कदाचिद्गोवाटमध्ये क्रीडतः । कदाचित् वत्सवाटं गच्छतः । कदाचिच्च गोवत्सपुच्छमाकर्षतः । यदातिचञ्चलावेकस्थानचरौ क्रीडन्तौ तौ वारयितुं यशोदा नै[16]ष्ट तदा सा कोपाविष्टा यष्टिमादाय तर्जयमाना कृष्णमुलूकखले दाम्ना बबन्ध । अधुना यदि शक्नो[17]षि तदा चञ्चलचेष्टित ! गच्छ पश्यामि इति वदन्ती सा गृहकर्म कर्तुमारेभे । तां च तस्मिन् [18]व्यग्रां दृष्ट्वा कृष्णः उलूखलं कर्षन् यमलार्जुनमध्येन जगाम । तेन तौ यमलार्जुनौ सहसा भग्नौ भूमौ पेततुः । तज्जन्यं कटकटाशब्दं समाकर्ण्य सर्वोऽपि व्रजजनो धावन् समायातः । ते चोन्मूलितौ महाद्रुमौ, तन्मध्यगतं च दा[19]म्नोदरे बद्धं नवोद्गताल्पपदन्तांशुसितहासं बालकं स्तिमितदृष्ट्या निरैक्षन्त[20] ॥

ततो गोपवृद्धा महोत्पात[21]भीरवः उद्विग्नाः[22] सन्तो मन्त्रयांचक्रिरे । “ अनेन स्थानेन न कार्यमस्माकम् । अन्यन्महावनं गच्छामः । अत्र हि बहव उत्पाता दृश्यन्ते । वृन्दावनन्तावद्रमणीयम् । तदेव शीघ्रं गच्छामः ’ इति ॥

तत्क्षणेन यूथशो वत्सबालान्कालयन्तो व्रजौकसः शकटैः गोधनैश्च वृन्दावनं प्रययुः । तत्रातिरूक्षेऽपि घर्मकाले प्रावृट्कालेव समन्ततो नवं सस्यमुद्बभूव । स सर्वो व्रजश्चन्द्रार्धाकारसन्निवेशः शकटी[23]वाटपर्यन्तो वृन्दावने समावासितः ॥

ततः प्रभृति सप्तवर्षदे[24]शीयौ रामदामोदरौ विश्वपालावपि वत्सपालौ बभूवतुः । [25]बर्हिपत्रकृतापीडौ वन्यपुष्पावतंसौ काकपक्षधरौ वंशवाद्यकृतस्वनौ तौ कुमारौ हसन्तौ च क्रीडन्तौ च वृन्दावनजनमनो जह्रतुः । गोपपुत्रैश्च समं वत्सांश्चारयन्तौ विचेरतुः ॥

व्यतीतेषु कतिपयदिनेषु प्रावृट्कालः समुपागतः । तस्मिन्मुदितौ रामकृष्णौ गोपालैः सह महावन इतस्ततो व्यहरताम् । क्वचिच्छीतवृक्षतलाश्रयौ गेयनृत्यरतौ, क्वचित्कद[26]म्बस्रक्चित्रौ क्रीडाकदम्बकासक्तौ, क्वचिद्गिरिधातुचित्रिताङ्गौ विविधव्यायामव्यापृतौ, क्वचित्पर्णशय्यामधि[27]शयानौ निद्रारसास्वादपरौ, क्वचिद्गर्जति जीमूते हाहाकाररवादृतौ, क्वचिद्गायतां गोपानां प्रशंसातत्परौ, क्वचिच्च मयूरकेकानुकारिणौ गोपवेणुवादनोद्यतौ, तावुभौ वने वने यथेच्छं संचेरतुः ॥

एकदा रामं [28] विना कृष्णो वृन्दावनं ययौ । सर्वतश्च भ्रमन् लोलकल्लोलशालिनीं कालिन्दीमवाप । तत्र विषाग्निश्रृतसलिलं महाभीषणं कालियनागस्य ह्रदं विलोक्य भगवांश्चिन्तयामास — ‘ मया पूर्वं निर्जितेन त्यक्तपयोनिधिना दुरात्मनानेन कालियेनेयं सर्वापि यमुना दूषिता गोपैर्गोधनैश्च तृषार्तैरपि नोपयुज्यते । तदस्य नागराजस्य मया निग्रहः कर्तव्यः, येन व्रजवासिनो निर्भयाः यमुनां सेविष्यन्ते । उत्पथगामिनां शासनार्थमेव ममावतारः ’ इति । एवं विचिन्त्य गाढं परि[29]करं बद्ध्वा महता वेगेन सर्पराजस्य ह्रदे स निपपात । तेन च महाह्रदोऽत्यर्थं चुक्षोभ । महोग्रविषज्वालातप्ताम्बुसिक्तास्तीरपादपाः सद्यो ज्वालाव्याप्तदिगन्तराः जज्वलुः । ततः कालिन्दीगतमहाभैरवह्रदमध्यप्रविष्टः कृष्णः प्रचण्डतरं भुजदण्डमा[30]स्फोटयामास ॥

अभूतपूर्वं कठोरध्वनिमाकर्ण्य आताम्रनयनो दुष्टविषज्वालाकुलैः फणैरावृतः महाविषैश्चान्यैरुरगैः परिवृतः प्रकम्पिततनुक्षेप-

चलत्कुण्डलकान्तिभिः हारिहारोपशोभिताभिः पर[31]श्शताभिर्नागपत्नीभिरनुसृतः नागरा[32]जोऽपि सहसा सलिलात्सवेगमुदसरत्। एते सर्वे भोगबन्धनं प्रवेश्य कृष्णं विषज्वालाकुलैः मुखैर्ददंशुः ॥

तीरस्था गोपाः सर्पभोगनिपीडितं तं दृष्ट्वा शोकाकुला व्रजमुपागम्य चुक्रुशुः—'भो! भो! व्रजौकसः! आगच्छत आगच्छत, त्वर[33]ध्व त्वरध्वम्, एष कृष्णः कालियह्रदे मग्नः। भक्ष्यते सर्पराजेन। परित्रायध्वम् परित्रायध्वम्' इति ॥

इति तेषां वज्रपातोपमं वचः श्रुत्वा नन्दादयः गोपाः यशोदाप्रमुखाश्च गोप्यः त्वरितत्वरिताः ह्रदं जग्मुः। तत्र ते सर्पराजवशंगतं निष्प्रयत्नं कृष्णं दृष्ट्वेतिकर्तव्य[34]तामूढाः अजायन्त। नन्दगोपः हा! पुत्र, क्वासि? [35]देहि मे प्रतिवचनम्। इत्युच्चार्य भूमौ निस्संज्ञः पपात। यशोदा च दूरादेव पुत्रमुखे दृशौ विन्यस्य चित्रार्पितेवाव[36]तस्थे। अन्यास्तपस्विन्यो गोप्यः शोककातराः रुरुदुः। सग[37]द्गदं च प्रोचुः—वयं सर्वा अत्र महाह्रदे विशामः, कृष्णं विहाय कथं वा व्रजे गम्यते? विना चन्द्रेण का निशा? विना [38]वृषेण का गावः? विना कृष्णेन को व्रजः?

इति करुणं गोपीवचः श्रुत्वा रौहिणेयेनावतारप्रयोजनं सं[39]स्मारितः कृष्णः स्मितभिन्नोष्ठ[40]सम्पुट आस्फोट्य भोगबन्धनात्स्वदेहं मोचयामास। उभाभ्यां हस्ताभ्यां मध्यमं फणमानतं कृत्वा तदुपर्युरु[41]विक्रमो ननर्त। कृष्णस्यांघ्रिनिकुट्टनैः कालियफणे व्रणा अभवन्। कृष्णस्य नृत्यलीलाभ्रमणेन अचिरादेव नागराजो मूर्च्छामुपययौ। दण्ड[42]पातनिपातेन च बहुरुधिरं ववाम ॥

तदवस्थं प्राणनाथं दृष्ट्वा नागपत्न्यो भगवन्तं शरणं जग्मुः। 'जगत्स्वामिन्! प्रसादं कुरु; भर्तृप्राणाः स्त्रीणां जीवितम् तद्भर्तृभिक्षां प्रदातुमर्हसि इति ताभिः प्रार्थितः, भगवन् देवदेवेश!, क्षम्यताम्

क्षम्यतां यन्मया दौरात्म्यमाश्रियते स सर्पजातिस्वभावस्यैवापराधः, न मम, यथाहं भवता सृष्टः तथैवाहं वर्ते इति कालीयेन च प्रयाचितो भगवान् यशोदानन्दनः—सर्प, न कदाचिदत्र यमुनाह्रदे स्थेयम्, त्वं सभृत्यपरिवारः समुद्रं व्रज, तव मत्पदाङ्कं दृष्ट्वा न त्वां गरुडः प्रहरिष्यति, इत्युक्त्वा सर्पराजं मुमोच ॥

प्रसन्नवदनाम्बुजः कृष्णः ह्रदमध्यात्तीरप्रान्तमुपागमत्। सर्वे मृत्योर्मुखात्प्रच्युतमिवाच्युतं मन्यमाना दृढं परिष्वज्य तं मूर्धनि नेत्रजैर्जलैः सिषिचुः। ततो नन्दयशोदादयः कृष्णसनाथा आनन्द[43]भरमन्थराः मन्दं मन्दं वव्रजुः। अन्यास्मिन्नह[44]नि रामकृष्णौ गाः पालयन्तौ रम्यं तालवनं जग्मतुः। तत्र किल मृगमांसकृताहारः खराकृतिर्धेनुको नाम दानवो निवसति स्म। तत्तालवनं पक्वफलसम्पत्समन्वितं दृष्ट्वा फलोपभोगस्पृहावन्तो गोपास्तावब्रुवन्—'हे राम! हे कृष्ण! यतोऽयं भूप्रदेशो धेनुकेन रक्ष्यते तत एवेमानि फलानि पक्वान्यवतिष्ठन्ते, वयं तान्यत्तुमभीप्सामः, पात्यन्तां यदि [45]रुच्यते' इति ॥

रामकृष्णौ च तथेति यथाकामं तालफलानि पातयामासतुः। फलपतनशब्दं च समाकर्ण्य दुरासदो दैतेयगर्दभः कोपाद्धावन्नाजगाम। पश्चिमाभ्यां पादाभ्यां स बलरामं जवेनोरसि जघान। रामोऽपि पादयोः गृहीत्वाम्बरे भ्रामणेनैव गतजीवितं तं तालवृक्षोपरि चिक्षेप। तालाग्रान्निपतन् खरः परोपकारीव सुबहूनि फलानि पृथिव्यां पातयामास। तद्दिनादारभ्य तस्मिन्तालवने गावो निराबाधाः[46a]अभुक्तचरं नवसस्यं सुखं[46b] चेरुः ॥

एवं धेनुकदैतेयं हत्वा जातहर्षौ तौ भांडीर[47]वटमागतौ। तत्र क्ष्वेड[48]मानौ प्रगायन्तौ वृक्षारोहक्रीडापरौ दूरान्नामभिर्व्याहृत्य गाः चारयन्तौ निर्यो[49]गपाशस्कन्धौ वनमालाविभूषितौ तौ बालशृङ्गाविवर्षभौ शुशुभाते ॥

महाबलौ तौ स्यन्दो[50]लिकाभिः [51] नियुद्धैः क्षेपणीयैश्चाश्मभिर्व्यायामं चक्रतुः । उभयो रममाणयोर्गोपवेषतिरोहितः प्रलम्बाख्योऽसुर आययौ । गोपैः सह क्रीडाव्याजेन कृष्णं रौहिणेयं च हन्तुं मनोरथं चक्रे । सर्वेऽपि गोपबालकाः हरिणा [52]क्रीडनं नाम बालक्रीडनकं कुर्वन्तो द्वौ द्वौ युगपदवहन् । श्रीदाम्ना सह गोविन्दः प्रलम्बेन सह बलरामश्च पुप्लुवतुः । ततः कृष्णः श्रीदामानं बलरामश्च प्रलंबं [53]व्यजयत । कृष्णपक्षीयैर्गोपैरन्यपक्षीयाः पराजिताः । ते स्कन्धे जेतॄनवहन् ॥

प्रलम्बस्तु संकर्षणं शीघ्रं स्कन्धेनोत्क्षिप्य निर्जगाम । बलघातोद्यतः स तद्भारमसहमानो महाकायो बभूव । संकर्षणस्तु दग्धशैलोपमेन तेनात्मानं नीयमानं दृष्ट्वा कृष्णमाचुक्रोश । “ कृष्ण ! कृष्ण ! केनाप्यनेन गोपालरूपेण दैत्येन [54] ह्रिये । त्रायस्व त्रायस्व ।” इति रक्षार्थमाहूयमानः कृष्णः विहस्य “ सत्यमेव किं त्वया मानुषो भावोऽवलम्ब्यते ? [55] स्वस्वरूपं स्मर दानवं [56] जहि । ” इति तं प्रत्यभाषत ॥

तदानीमेवान्य इव बलरामः प्रलम्बं मूर्ध्नि मुष्टिना प्रजहार । तेन प्रहारेण तस्य लोचने बहिर्याते । निष्कासितमस्ति[57]ष्कः प्रलम्बो मुखाच्छोणितमुद्वमन् महीपृष्ठे निपपात ॥

अथ शरत्काले संप्राप्ते शक्रोत्सवलालसान् गोपान् दृष्ट्वा कृष्णो गोपवृद्धान् कुतूहलान् पप्रच्छ—“ आर्याः, कोऽयं शक्रोत्सवो नाम ? इति ।” सादरं पृच्छन्तं तं नन्दगोपः प्राह—“ वत्स, मेघानां पयसां चेशो देवराजः शक्रः । तेन संचोदिता मेघा जलं वर्षन्ति, तेन सस्यानि प्ररोहन्ति, इमा गावः क्षीर[58]वत्यः [59]वत्सवत्यश्च भवन्ति । यत्र वृष्टिमन्तो मेघा दृश्यन्ते तत्र—वत्स, कथयामि—नास[60]स्या नातृणा भूमिर्भवति । न तत्र दुर्भिक्षवार्तापि । तस्माद्गतायां प्रावृषि सर्वे राजानः सर्वेऽपि मनुजा महैः सुरेशमर्चन्ति ”। इति ॥

इति नन्दवचनं श्रुत्वा दामोदरः पितरमाह—"तात ! न वयं कर्षका नापि वणिजः । वयं तावत् वनचराः । गावोऽस्माकं दैवतम् । यदेव नर उपजीवति तदेव तस्य दैवतम् । तदेवार्चनीयम् । एकस्य फलमश्नन्नपरं पूजयन्मानवो न क्वचिच्छोभनमाप्नोति । कृष्यन्ताः सीमाः,[61] सीमान्तं वनं, वनान्ताश्च गिरयः, त एवास्माकं गोपानां परमं दैवतम् । प्रसिद्धमेवैतद्यथा चक्र[62a]चारिणो गोपाः सुखिनस्तथा न द्वार[62b]बन्धावरणा नागरकाः । न वा गृहक्षे[63]त्रिणो ग्रामवासिनः । तात, श्रूयते किल यथामी गिरयः अस्मिन्वने स्वेषु सा[64]नुषु तत्तद्रूपमास्थाय कामरूपिणो रमन्ते । काननौकसां हिंसकान् सिंहादिरूपैर्हिंसन्ति । तस्माद्गिरियज्ञो गोयज्ञश्च प्रवर्त्यताम् । किमस्माकं महेन्द्रेण ? वणिजः कर्षकाश्च शक्रमहं कामं कुर्वन्तु । अयमस्माकं गवां वर्धयिता गोवर्धनो गिरिः विविधार्हणैर्यथाविधि मेध्यं[65] पशुं हत्वा पूज्यताम् । सर्वघोषस्य [66]सन्दोहो गृह्यताम् । विप्राः शतशो भोज्यन्ताम् । गोगणाश्च शरत्पुष्पैरलङ्क्रियन्ताम्, इति ॥

इति कृष्णवचः श्रुत्वा नन्दाद्या व्रजौकसः प्रीत्युत्फुल्लमुखाः "साधु साधु" इति समवदन्त । वत्स, शोभनं ते मतम् । भवदुक्तं करिष्यामहे इति तमभिनन्द्य गिरियज्ञसम्भारसाधनकर्मणि ते प्रवृत्ता बभूवुः ॥

आत्ममहं प्रतिहत्य गिरियज्ञं व्रजौकसश्चक्रुरित्युपलभ्य क्रोधारुणितलोचनः शतक्रतुः संवर्तकं नाम तोयदगणं कृष्णबलाध्मातानां गोप[67]हतकानां गा वृष्टिपातेन पीडयत इत्यादिदेश । ततः क्षणेन महाभीमं प्रचण्डध्वनिं वातवर्षं विनाशाय बलाहका ववर्षुः । धारासारमहापूरणेन धरणी ककुभोऽम्बरश्चाभिन्नतामवापुः । विद्युल्लता[68]कशाघातत्रस्तैरिव नादापूरितदिक्चक्रैर्घनैर्घना वारिधारा विसृष्टाः । घना[69]घनैरन्धकारीकृते लोकेऽधश्चोर्ध्वं च तिर्यक्च जगदाप्य[70]मिवाभवत् ।

काश्चिद्गावः वातवर्षधूताः सन्नत्रिक[71]सक्थिशिरोधराः प्राणाञ्जहुः । काश्चिदन्या वत्सान्क्रोडेना[72]क्रम्य तस्थुः । काश्चिच्चापरा वारिपूरेण विवत्सा भूत्वा चक्रन्दुः ॥

तत्सर्वं गोकुलं गोपजनविमुक्तहाहाकारनिनादितमतीवार्तं दृष्ट्वा हरिराचिन्तयत्— " आम्! ज्ञातम् । महभङ्गविरोधिना महेन्द्रेणैतत् कृतम् । तदेतदखिलं गोष्ठमधुना मया त्रातव्यम् । अद्रिमुत्पाट्य पृथुच्छत्रमिव गोष्टस्योपरि धारयिष्यामि " इति ॥

एकेन करेण गोवर्धनमुत्पाट्य भगवान् गोपालो लीलया धारयामास । गोपाः, गोधनैः सह वत्सैः सह शकटारोपितभाण्डादिभिश्च सह निःशङ्कमत्र प्रविशत " इत्युक्तास्ते गोपाः शैलतलं सिषेविरे । सप्त[73]रात्रं महामेघाः ववर्षुः । तथापि गोपानक्षतान् ज्ञात्वा मिथ्याप्रतिज्ञो देवेन्द्रः तान्घनान् वारयामास । पुनरपि गोपा गोकुलं जग्मुः । कृष्णोऽपि विस्मितमुखैर्गोपालैः दृश्यमानः गोवर्धनं स्वस्थाने स्थापयामास ॥

गोवर्धनधरं गोपालं दिदृक्षुर्महेन्द्रः महीमवततार । गोपकुमारकैर्वृतं गाश्चारयन्तमदृश्येन च गरुडेन पक्षाभ्यां कृतच्छायं भगवन्तमुपगम्यैकान्ते शक्रः सस्मितं उवाच—प्रभो, क्षन्तव्योऽस्मि, महभङ्गरोषितेन मया एतदाचरितम्, तथापि महागिरिमुत्पाट्य गावस्त्राताः, अद्भुतेन ते कर्मणा जानामि " यद्भूभारावतारणार्थं परमेश्वरोऽवतीर्णोऽसी ' ति । त्वया त्राताभिर्गोभिः प्रचोदितस्त्वां गवां-इन्द्रत्वे-गोविन्दत्वे परया मुदाऽभिषिञ्चामि । भगवन् अभिषेकस्वीकारेण गावोऽनु[74]गृह्यन्ताम्, अपरं चैतद्विज्ञाप्यते—' यन्मदंशोऽर्जुनो नामेहावतीर्णोऽस्ति स कृपया रक्षणीयः, इति । तथेति कृष्णेनाभिनन्दितो देवराज आत्मानं कृतकृत्यं मन्यमानो दिव[75]मारुरोह ॥

प्रतिमानाटकम्

ಇದನ್ನು ರಚಿಸಿದುದು ಭಾಸಮಹಾಕವಿ. ಇಲ್ಲಿನ ಕಥಾಭಾಗವು ವಾಲ್ಮೀಕಿ ರಾಮಾಯಣದ ಅಯೋಧ್ಯಾಕಾಂಡ, ಅರಣ್ಯಕಾಂಡ ಮತ್ತು ಯುದ್ಧಕಾಂಡಗಳಿಂದ ತೆಗೆದುಕೊಳ್ಳಲ್ಪಟ್ಟಿರುವುದು. ಭರತನು ತನ್ನ ಸೋದರಮಾವನ ಮನೆಯಿಂದ ಬಂದಮೇಲೆ ತನ್ನ ಪೂರ್ವಿಕರ ಶಿಲಾ ಪ್ರತಿಮೆಗಳ ಶಾಲೆಯಲ್ಲಿ ತನ್ನ ತಂದೆಯಾದ ದಶರಥ ಚಕ್ರವರ್ತಿಯ ಪ್ರತಿಮೆಯನ್ನು ನೋಡಿದುದರ ಪರಿಣಾಮವಾಗಿ ಈ ಕಥೆಯು ಪ್ರತಿಮಾ ನಾಟಕವೆಂಬ ಹೆಸರನ್ನು ಪಡೆಯಿತು.

ಭಾಸನು ಮಹಾಕವಿ ; ಬಹು ಹಿಂದಿನ ಕಾಲದವನು. ಈತನ ಕಾಲವನ್ನು ಕುರಿತು ಭಿನ್ನಾಭಿಪ್ರಾಯಗಳಿದ್ದರೂ, ಕಾಳಿದಾಸನಿಗೆ ಹಿಂದಿನವನೆಂಬುದರಲ್ಲಿ ಯಾವ ವಿವಾದವೂ ಇಲ್ಲ. ಕಾಳಿದಾಸನೇ ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರವೆಂಬ ತನ್ನ ನಾಟಕದಲ್ಲಿ ಈತನನ್ನು ಕುರಿತು ಹೊಗಳಿರುವನು. ಈತನ ಶೈಲಿ, ಪಾತ್ರ ರಚನೆ, ಅಪೂರ್ವಪ್ರಯೋಗಗಳು ಇವುಗಳನ್ನು ಪರಿಶೀಲಿಸಿ ಈತನು ಕ್ರಿ. ಶ. 2ನೆಯ ಶತಮಾನದವನೆಂದು ಅಭಿಪ್ರಾಯಪಟ್ಟಿದ್ದಾರೆ.

ಭಾಸನ ಶೈಲಿಯು ಅತಿ ಸರಳವಾದುದು. ಆದರೂ ಕೆಲವೆಡೆಗಳಲ್ಲಿ ಓದುವವರ ಬುದ್ಧಿಶಕ್ತಿಯನ್ನು ಅಳೆಯುವಂತಿದೆ. ರಾಮಾಯಣ, ಮಹಾಭಾರತ ಮೊದಲಾದ ಮೂಲಗ್ರಂಥಗಳನ್ನು ಚೆನ್ನಾಗಿ ತಿಳಿದವರಿಗೆ ಮಾತ್ರವೇ ಕೆಲವು ಸಂದರ್ಭಗಳು ಅರ್ಥವಾಗುವುವು. ವ್ಯಾಕರಣವು ಸಾಮಾನ್ಯವಾಗಿ ಪಾಣಿನಿಯನ್ನೇ ಅನುಸರಿಸಿಲ್ಲ. ತನ್ನ ನಾಟಕಗಳಲ್ಲಿ ಈಚಿನವರಂತೆ ತನ್ನ ಹೆಸರನ್ನು ಈತನು ಹೇಳಿಕೊಂಡಿಲ್ಲ.

ಭಾಸನ ನಾಟಕಗಳು ಹದಿಮೂರು ಅವು : (1) ಮಧ್ಯಮವ್ಯಾಯೋಗ (2) ಪಂಚರಾತ್ರ (3) ದೂತವಾಕ್ಯ (4) ದೂತಘಟೋತ್ಕಚ (5) ಕರ್ಣಭಾರ (6) ಊರುಭಂಗ (7) ಪ್ರತಿಮಾನಾಟಕ (8) ಅಭಿಷೇಕನಾಟಕ (9) ಬಾಲಚರಿತ (10) ಪ್ರತಿಜ್ಞಾಯೌಗಂಧರಾಯಣ (11) ಸ್ವಪ್ನವಾಸವದತ್ತ (12) ಅವಿಮಾರಕ (13) ಚಾರುದತ್ತ ಎಂಬುವು. ಈ ಹದಿಮೂರು ನಾಟಕಗಳೂ ಭಾಸಮಹಾಕವಿಯವೇ ಎಂದು ಪ್ರಸಿದ್ಧಪಡಿಸಿದವರು ತಿರುವನಂತಪುರದ ಶ್ರೀಗಣಪತಿಶಾಸ್ತ್ರಿಗಳವರು.

ಇಲ್ಲಿ ತೆಗೆದುಕೊಂಡಿರುವುದು ಪ್ರತಿಮಾನಾಟಕದ ಎರಡನೆಯ ಅಂಕ. ಶ್ರೀರಾಮಚಂದ್ರನು ಅರಣ್ಯಕ್ಕೆ ಹೊರಟು ಹೋದನು. ದಶರಥಚಕ್ರವರ್ತಿಯು ಅದನ್ನು ಕುರಿತು ಶೋಕಿಸುವನು. ಕೌಸಲ್ಯೆ ಮತ್ತು ಸುಮಿತ್ರಾದೇವಿಯರು ಆತನನ್ನು ಸಂತೈಸುವರು. ಸುಮಂತ್ರನು ಹಿಂತಿರುಗಿ ರಾಮ, ಲಕ್ಷ್ಮಣ, ಸೀತೆಯರು ಅರಣ್ಯವನ್ನು ಸೇರಿದ ಸಂಗತಿಯನ್ನು ವಿಜ್ಞಾಪಿಸುವನು. ದಶರಥನು ಶೋಕದಿಂದ ಕೂಡಿದವನಾಗಿ ಸುಮಂತ್ರನನ್ನು ಕುರಿತು ಕೈಕೆಗೆ ಭರತಕುಮಾರನನ್ನು ಶೀಘ್ರವಾಗಿ ಕರೆಸುವಂತೆ ಹೇಳಲು ಆಜ್ಞಾಪಿಸುವನು. ತನ್ನ ಪೂರ್ವಿಕರನ್ನು ನೆನೆದುಕೊಂಡು ಶೋಕತಾಳದೆ ಮೂರ್ಛೆಹೋಗುವನು.

प्रतिमानाटकम्

[ततः प्रविशति काञ्चुकीयः]

काञ्चुकीयः—भो! भोः! प्रतिहारव्यापृताः, स्वेषु स्वेषु स्थानेष्वप्रमत्ता भवन्तु भवन्तः।

(प्रविश्य)

प्रतिहारी—आर्य, किमेतत्?

काञ्चुकीयः—एष हि महाराजः सत्यवचनरक्षणपरं राममरण्यं गच्छन्तमुपावर्तयितुमशक्तः पुत्रविरहशोकाग्निना दग्ध[1]हृदयः उन्मत्त इव बहु प्रलपन् समुद्र[2]गृहके शयानः—

मेरुश्चलन्निव युगक्षयसन्निकर्षे
शोषं व्रजन्निव महो[3]दधिरप्रमेयः।
सूर्यः पतन्निव च मण्डलमात्रलक्ष्यः
शोकाद्भृशं शिथिलदेहमतिर्नरेन्द्रः॥ १॥

प्रतिहारी—हा! हा! एवं गतो [4] महाराजः।

काञ्चुकीयः—भवति, गच्छ।

प्रतिहारी—आर्य, तथा।

(निष्क्रान्ता)

काञ्चुकीयः—(सर्वतो विलोक्य) अहो नु खलु रामनिर्गमनदिनादारभ्य [5] शून्यैवेयमयोध्या संलक्ष्यते! कुतः—

नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनः
हेषाशून्यमुखाः सवृद्धवनिता बालाश्च पौरा जनाः।

त्यक्ताहारकथाः सुदीनवदनाः क्रदन्त उच्चैर्दिशा
रामो याति यया सदा[7]रसहजस्तामेव पश्यन्त्यमी ॥ २ ॥

यावदहमपि महाराजस्य समीपवर्ती भविष्यामि । (परिक्रम्यावलोक्य)

अये! अयं महाराजो महादेव्या सुमित्रया च सुदुःसहमपि पुत्रविरह-समुद्भवं शोकं निगृह्यात्मानमेव [8]संस्थापयन्तीभ्यामन्वास्यमानस्तिष्ठति। कष्टा खलु अवस्था वर्तते। एष महाराजः—

पतत्युत्थाय[9] चोत्थाय हाहेत्युच्चैर्लपन्मुहुः।
दिशं पश्यति तामेव यया यातो रघूद्वहः ॥ ३ ॥

(निष्क्रान्तः)

(विष्कम्भकः)

[ततः प्रविशति यथानिर्दिष्टो राजा देव्यौ च]

राजा—

हा वत्स! राम जगतां नयनाभिराम
हा वत्स! लक्ष्मण सलक्षणसर्वगात्र।
हा साध्वि! मैथिलि पतिस्थितचित्तवृत्ते
हा हा गताः किल वनं बत मे तनूजाः ॥ ४ ॥

चित्रमिदं भोः! यद्भ्रातृस्नेहात् पितरि विमुक्तस्नेहमपि तावल्लक्ष्मणं द्रष्टुमिच्छामि। वधु वैदेहि,

रामेणापि परित्यक्तो लक्ष्मणेन च गर्हितः।
अयशोभाजनं लोके परित्यक्तस्त्वयाप्यहम् ॥ ५ ॥

पुत्र राम, वत्स लक्ष्मण, वधु वैदेहि, प्रयच्छत मे प्रतिवचनं[10]पुत्रकाः। शून्यमिदं भोः! न मे कश्चित् प्रतिवचनं प्रयच्छति । कौसल्या[11]-मातः, क्वासि?

सत्यसन्ध जितक्रोध विमत्सर जगत्प्रिय ।
गुरुशुश्रूषणे युक्त प्रतिवाक्यं प्रयच्छ मे ॥ ६ ॥

हा ! क्वासौ सर्वजनहृदयनयनाभिरामो रामः । क्वासौ मयिगुर्वनुवृत्तिः क्वासौ शोकार्तेष्वनुकम्पा । क्वासौ तृणवदगणितराज्यैश्वर्यः । पुत्र राम, वृद्धं पितरं मां परित्यज्य किम[12]सम्बद्धेन धर्मेण ते कृत्यम् ? हा धिक् ! कष्टं भोः—

सूर्य इव गतो रामो, सूर्यं दिवस इव लक्ष्मणोऽनुगतः ।
सूर्यदिवसा[13]वसाने छायेव न दृश्यते सीता ॥ ७ ॥

(ऊर्ध्वमवलोक्य) भोः ! कृतान्त[14]हतक,

अनपत्या वयं, रामः पुत्रोऽन्यस्य महीपतेः ।
वने व्याघ्री च कैकेयी, त्वया किं न कृतं त्रयम् ॥ ८ ॥

कौसल्या—(सरुदितम्) अलमिदानीं महाराजोऽतिमात्रं सन्तप्य परवशमात्मानं कर्तुम् । ननु सा तौ च कुमारौ महाराजस्य समयावसाने [15a] प्रेक्षितव्या भविष्यन्ति ।

राजा—का त्वं भोः ?

कौसल्या—अस्निग्धपुत्रप्रसविनी खल्वहम् ।

राजा—कौसल्ये, [15b] सारवती खल्वसि । त्वयया हि खलु रामो गर्भे धृतः ।

अहं हि दुःखमत्यन्तमसह्यं ज्वलनोपमम् ।
नैव सोढुं न संहर्तुं [16] शक्नोमि मुषितेन्द्रियः[17] ॥ ९ ॥

(सुमित्रां विलोक्य) इयमपरा का ?

कौसल्या—महाराज, वत्स लक्ष्मण—(इत्यर्धोक्ते)

राजा—(सहसोत्थाय) क्वासौ क्वासौ लक्ष्मणः ! न दृश्यते । भोः कष्टम् !

(देव्यौ ससम्भ्रममुत्थाय राजानमवलम्बेते)

कौसल्या—महाराज, वत्स लक्ष्मणस्य जननी सुमित्रेति वक्तुं मयोपक्रान्तम् ।

राजा—अयि सुमित्रे,

तवैव पुत्रः सत्पुत्रो येन नक्तं[18]दिवं वने।
रामो रघुकुलश्रेष्ठश्छाययेवानुगम्यते ॥ १० ॥

(प्रविश्य)

काञ्चुकीयः—जयतु महाराजः। एष खलु तत्रभवान् सुमन्त्रः प्राप्तः।

राजा—(सहसोत्थाय सहर्षम्) [19]अपि रामेण?

काञ्चुकीयः—न खलु! रथेन।

राजा—कथं कथं रथेन केवलेन। (इति मूर्छितः पतति)

देव्यौ—महाराज, समाश्वसि[20]हि समाश्वासिहि।

(गात्राणि परामृशतः)

काञ्चुकीयः—भोः! कष्टम्। ईदृग्विधाः पुरुषविशेषाः ईदृशीमापदं प्राप्नु-[21a] वन्तीति विधिरनतिक्रमणीयः। महाराज, समाश्वसिहि समाश्वसिहि।

राजा—(किञ्चित्समाश्वस्य) बालाके! सुमन्त्रः एक एव ननु प्राप्तः?

काञ्चुकीयः—अथकिम्[21b]।

राजा—कष्टम् भोः!

शून्यः प्राप्तो यदि रथो भग्नो मम मनोरथः।
नूनं दशरथं नेतुं कालेन प्रेषितो रथः ॥ ११ ॥

तेन हि शीघ्रं प्रवेश्यताम्।

काञ्चुकीयः—यदाज्ञापयति महाराजः। (निष्कान्तः)

राजा—

[22]धन्याः खलु वने वातास्तटाकपरिवर्तिनः।
विचरन्तं वने रामं ये स्पृशन्ति यथासुखम् ॥ १२ ॥

(ततः प्रविशति सुमन्त्रः)

सुमन्त्रः—(सर्वतो विलोक्य सशोकम्)—

एते भृत्याः स्वानि कर्माणि हित्वा
स्नेहाद्रामे जातबाष्पा[23]कुलाक्षाः ।
चिन्तादीनाः शोकसन्दग्धदेहाः
विक्रोशन्तं पार्थिवं गर्हयन्ति ॥ १३ ॥

(उपेत्य) जयतु महाराजः ।

राजा—भ्रातः सुमन्त्र, क्व मे ज्येष्ठो रामः ? न हि न हि युक्तमभिहितं मया ।

क्व ते ज्येष्ठो रामः प्रियसुत सुतः, सा क्व दुहिता
विदेहानां भर्तुः निरतिशयभक्तिर्गुरुजने ।
क्व वा सौमित्रिर्मां हतपितृकमासन्नमरणं
किमप्याहुः किं ते सकलजनशोकार्णवकरम् ॥ १४ ॥

सुमन्त्रः—महाराज मा मैवं, अमङ्गलवचनानि [24] भाषिष्ठाः । अचिरादेव तान् द्रक्ष्यसि ।

राजा—सत्यमयुक्तमभिहितं मया । नायं तपस्विनामुचितः प्रश्नः । तत् कथ्यताम् । अपि तपस्विनां तपो वर्धते ? अप्यरण्यानि स्वाधीनानि विचरन्ती वैदेही न परिखिद्यते ?

सुमित्रा—सुमन्त्र, बहुवल्कलालङ्कृतशरीरा बालाप्यबालचारित्रा भर्तुः सहधर्मचारिणी अस्मान् महाराजं च किञ्चिन्नालपति ?

सुमन्त्रः—सर्व एव महाराजं—

राजा—न न । श्रोत्ररसायनैर्मम हृदयातुरौषधैः तेषां नामधेयैरेव श्रावय ।

सुमन्त्रः—यदाज्ञापयति महाराजः । आयुष्मान् रामः—

राजा—राम इति । अयं रामः । तन्नामश्रवणात् स्पृष्ट इव मे प्रतिभाति । ततस्ततः ।

सुमन्त्रः—आयुष्मान् लक्ष्मणः ।

राजा—अयं लक्ष्मणः । ततस्ततः ।

सुमन्त्रः—आयुष्मती सीता जनकराजपुत्री ।

राजा—इयं वैदेही । रामो लक्ष्मणो वैदेहीत्ययमक्रमः ।

सुमन्त्रः—अथ कः क्रमः ?

राजा—रामो वैदेही लक्ष्मण इत्यभिधीयताम् ।

रामलक्ष्मणयोर्मध्ये तिष्ठत्वत्रापि मैथिली ।
बहुदोषाण्यरण्यानि सना[25]थैषा भविष्यति ॥ १५ ॥

सुमन्त्रः—यदाज्ञापयति महाराजः । आयुष्मान् रामः—

राजा—अयं रामः ।

सुमन्त्रः—आयुष्मती जनकराजपुत्री ।

राजा—इयं वैदेही ।

सुमन्त्रः—आयुष्मान् लक्ष्मणः ।

राजा—अयं लक्ष्मणः । राम, वैदेहि, लक्ष्मण, परिष्वजध्वं मां पुत्रकाः !

सकृत् स्पृशामि वा रामं सकृत्पश्यामि वा पुनः ।
गतायुरमृतेनेव जीवामीति मतिर्मम ॥ १६ ॥

सुमन्त्रः—शृङ्गिबेरपुरे रथादवतीर्यायोध्याभिमुखाः स्थित्वा सर्व एव महाराजं शिरसा प्रणम्य विज्ञापयितुमारब्धाः ।

कमप्यर्थं चिरं ध्यात्वा वक्तुं प्रस्फुरिताधाराः ।
बाष्पस्तम्भितकण्ठत्वादनुक्त्वैव वनं गताः ॥ १७ ॥

राजा—कथं अनुक्त्वैव वनं गताः !

(इति द्विगुणं मोहमुपगतः)

सुमन्त्रः—(ससम्भ्रमम्) बालाके, उच्यताममात्येभ्यः । "अप्रतीकारायां दशायां वर्तते महाराज" इति ।

कञ्चुकीयः—तथा । (निष्क्रान्तः)

देव्यौ—महाराज, समाश्वसिहि समाश्वसिहि ।

राजा—(किञ्चित्समाश्वस्य)

अङ्गं मे स्पृश कौसल्ये न त्वां पश्यामि चक्षुषा ।
रामं प्रति गता बुद्धिरद्यापि न निवर्तते ॥ १८ ॥

पुत्र राम, यत् खलु मया सन्ततं चिन्तितम्—

राज्ये त्वामभिषिच्य सन्नरपतेर्लाभात्कृतार्थाः प्रजाः
कृत्वा त्वत्सहजान्समानविभवान्कुर्वात्मनः सन्ततम् ।
इत्यादिश्य च ते तपोवनमितो गन्तव्यमित्येतया
कैकेय्या हि तदन्यथा कृतमहो निश्शेषमेकक्षणे ॥ १९ ॥

सुमन्त्र, उच्यतां कैकेय्याः—

गतो रामः प्रियं तेऽस्तु[26] त्यक्तोऽहमपि जीवितैः ।
क्षिप्रमानीयतां पुत्रः पापं सफलमस्त्विति ॥ २० ॥

सुमन्त्रः—यदाज्ञापयति महाराजः ।

राजा—(ऊर्ध्वमवलोक्य) अये ! रामकथाश्रवणसंदग्धहृदयं मामाश्वासयितुमागताः पितरः । कोऽत्र ? (प्रविश्य)

काञ्चुकीयः—जयतु महाराजः ।

राजा—आप[27]स्तावत् ।

काञ्चुकीयः—यदाज्ञापयति महाराजः । (निष्क्राम्य प्रविश्य) जयतु महाराजः । इमा आपः ।

राजा—(आचम्य अवलोक्य)

अयममरपतेः [28]सखा दिलीपो
रघुरयमत्र भवानजः पिता मे ।
किमभिगमनकारणं भवद्भिः
सहवसने समयो ममापि तत्र ॥ २१ ॥

राम, वैदेहि, लक्ष्मण, अहमितः पितॄणां सकाशं गच्छामि । हे पितरः, अयमहमागच्छामि ।

(मूर्छया परामृष्टः)

(काञ्चुकीयो यवनिकास्तरणं करोति)

सर्वे—हा! हा! महाराजः।

(निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः

टिप्पणी।

अजनृपस्वयंवरप्रस्थानम्

संख्या.

1 **विश्वं जयतीति—विश्वजित्**—ಎಲ್ಲ ರಾಜರನ್ನೂ ಗೆದ್ದ ಕ್ಷತ್ರಿಯ ವೀರನು. ಅಂತಹವನು ಮಾಡುವ ಮಹಾಯಾಗಕ್ಕೂ '**विश्व-जित्**' ಎಂಬ ಹೆಸರು ಬಂದಿದೆ.

2 **मृदो विकारः-मृण्मयं**—ಮಣ್ಣಿನಪಾತ್ರೆ. **तद्धितवृत्तिः.**

3 **हिरण्यस्य विकाराः—हिरण्मयानि**—ತದ್ಧಿತವೃತ್ತಿ.

4 **अर्घार्थमिदं—अर्घ्यं** (ತ. ವೃ).

5 '**आतिथेयः**' '**अतिथिषु साधुः**' '**पथ्यतिथिस्वपतेर्ढञ्**' '**ढ**' ಪ್ರತ್ಯಯವು, ಅದಕ್ಕೆ '**एय**' ಆದೇಶವೂ ಒಂದು ರೂಪವಾಗಿದೆ. (ತ. ವೃ).

6a **विधिं अर्हतीति—विधिवत्** (त. वृ). '**तदर्हं**' ಎಂಬ ಸೂತ್ರದಿಂದ **वत्** ಪ್ರತ್ಯಯು ಬಂದು ಅವ್ಯಯವಾಗಿದೆ.

6b **तपोधनं**—ತಪಸ್ಸೆ ಶ್ರೇಷ್ಠವಸ್ತುವಾಗಿ ಉಳ್ಳ. ಋಷಿಗಳು ಹಣವನ್ನು ನಿಕೃಷ್ಟವಾಗಿ ತಿಳಿದಿರುವುದರಿಂದ ತಪಸ್ಸಿನಲ್ಲಿ ಧನತ್ವಾರೋಪವು ಉಚಿತವಾಗುವುದಿಲ್ಲ.

6c **मानधनाग्रयायी**—ಮಾನಿಗಳಲ್ಲಿ ಮುಂದಾಳಾದ-ಅಪಕೀರ್ತಿಗೆ ತುಂಬಾ ಹೆದರುವ—ಎಂದಾಶಯ.

7a **अग्रं नयतीति—अग्रणीः** (ಕೃದ್ವೃತ್ತಿ).

7b **मन्त्रकृताम्**—ಬಲವಾದ ಮಂತ್ರಗಳನ್ನು ತಪೋಬಲದಿಂದ ನೋಡುವ, **अग्रणी** ಶಬ್ದವು **सेनानी** ಶಬ್ದದಂತೆ ನಡೆಯುವುದು.

8 **वासवधैर्यलोपि**—ಇಂದ್ರಪದವಿಯನ್ನು ಕಸಿದುಕೊಳ್ಳುವುದೆಂಬ ಭಯವುಂಟುಮಾಡುವ.

9 '**कच्चित्**'—ಇದು ಪ್ರಶ್ನಾರ್ಥಕ ಅವ್ಯಯ. ಪ್ರಶ್ನೆಮಾಡುವ ಅಂಶವು ಪ್ರಾಶ್ನಿಕನಿಗೆ ಅಭಿಮತವೆಂಬುದನ್ನು ತಿಳಿಸುವುದು. ಸೂ. (**काम-प्रवेदने कच्चिति**).

10 **श्रमं छिन्दन्तीति—श्रमच्छिदः**—(ಕೃದ್ವೃತ್ತಿ) ಸುಹೃತ್ ಶಬ್ದದಂತೆ ನಡೆಯುತ್ತದೆ.

संख्या.

11 **तदङ्कशय्याच्युतनाभिनाला** — ದುಷ್ಟಮೃಗಗಳ ಭಯದಿಂದ ನಾಭೀ ಬಳ್ಳಿಯು ಕಳೆಚಿಬಿದ್ದು ಸ್ವತಂತ್ರವಾಗಿ ಓಡಾಡುವ ತನಕ ಮುನಿಗಳು ಜಿಂಕೆ ಮರಿಗಳನ್ನು ತೊಡೆಯ ಮೇಲೆಯೇ ಎತ್ತಿಕೊಂಡು ಇರುತ್ತಿದ್ದರೆಂದು ಅಭಿಪ್ರಾಯ.

12 **अनघा**—ಅಪಾಯವಿಲ್ಲದುದಾಗಿ.

13 **उञ्छषष्ठाङ्कितसैकतानि**—ಹರಡಿದ್ದು ರಾಶಿಮಾಡಲ್ಪಟ್ಟ ನೀವಾರ ಧಾನ್ಯಗಳ-ರಾಜಗ್ರಾಹ್ಯವಾದ ಆರನೆಯ ಒಂದು ಭಾಗದಿಂದ ಕೂಡಿದ ಮಳಲುದಿಣ್ಣೆಗಳುಳ್ಳ.

14 **कडङ्गरं अर्हन्तीति—कडङ्गरीयाः**—ತೌಡು ಹೊಟ್ಟು ಇವನ್ನು ತಿನ್ನುವ ರೂಢಿಯುಳ್ಳ ಹಸು ಎಮ್ಮೆ ಮೊದಲಾದುವು. (ತದ್ಧಿತವೃತ್ತಿ) ಪೋಲೀ ರಾಸುಗಳು.

15 **जनपदेभ्यः आगताः—जानपदाः**—ನಗರ ಗ್ರಾಮಾದಿಗಳಿಂದ ಬಂದ (ತ. ವೃ). **जनानां+पदं=जनपदः**—ಬಹುಜನ ವಾಸಿಸುವ ಪ್ರದೇಶ. '**नाड्यपजनोपपदानि-व्रणाङ्गपदानीति**' ಎಂಬ ವಾರ್ತಿಕೆಯಿಂದ **पद** ಶಬ್ದವು ಪುಲ್ಲಿಂಗವಾಗಿದೆ.

16 **शरीरस्थिति**—ಜೀವನಕ್ಕೆ.

17 **गृहाय**—ಗೃಹಸ್ಥಾಶ್ರಮವನ್ನು ಹೊಂದಲು.

18 **सर्वोपकारक्षमं**—ಮಿಕ್ಕ ಆಶ್ರಮಗಳಿಗೆಲ್ಲಾ ಉಪಕಾರಮಾಡಲು ಶಕ್ತವಾದ. **यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः । वर्तन्ते-गृहिणस्तद्वदाश्रित्येतर आश्रमाः ॥** ಎಂದು ಮನು ಹೇಳಿರುತ್ತಾನೆ.

19 **नियोगक्रियया उत्सुकं**, ಇಲ್ಲಿ '**प्रसितोत्सुकाभ्यां तृतीया च**' ಎಂಬ ಸೂತ್ರದಿಂದ ಸಪ್ತಮ್ಯರ್ಥದಲ್ಲಿ ತೃತೀಯಾ ವಿಭಕ್ತಿ ಬಂದಿರುತ್ತೆ.

20 **वार्तं**—ಆರೋಗ್ಯವು.

21 **अव-इहि—इण्-गतौ**—ಧಾತುವಿನ ಲೋಟ್ ಮಧ್ಯಮಪುರುಷ, ಏ. ವ.

22 **प्रतीक्ष्येषु**—ಪೂಜ್ಯರಲ್ಲಿ.

23 **अति-शेष**—ಮೇಲಾಗಿರುತ್ತೀಯೆ. **शीङ्, स्वप्ने, लट्, म. पु. ए. व.**

24 **तीर्थप्रतिपादितर्द्धिः**—ಸತ್ಪಾತ್ರಗಳಲ್ಲಿ ವಿನಿಯೋಗಿಸಲ್ಪಟ್ಟ ಸಂಪತ್ತುಳ್ಳ.

संख्या.

25 **आरण्यकाः, अरण्ये भवाः**—'**अरण्यान्मनुष्ये**'—ಎಂಬ ಸೂತ್ರದಿಂದ ತದ್ಧಿತಪ್ರತ್ಯಯ ಅಕಾದೇಶ ಬಂದಿರುತ್ತೆ. ತಪಸ್ವಿಗಳು ಎಂದರ್ಥ.

26 **स्तम्बेन**—ಕಾಂಡಮಾತ್ರದಿಂದ.

27 **स्थाने**—ಯುಕ್ತವು (ಅವ್ಯಯ).

28 **अकिञ्चनत्वं**—ನಿರ್ಧನತೆಯನ್ನು.

29*a* **वि-अनक्ति, अञ्जू-व्यक्तौ,** ಧಾತುವಿನ **लट्** ಪರ. ಪ್ರ. ಏ. 7ನೇ ಗಣ.

29*b* **पर्यायपीतस्य**—ಅಮೃತಾಹಾರಿಗಳಾದ ದೇವತೆಗಳಿಂದ ದಿನಕ್ಕೊಂದೊಂದು ಅಮೃತಕಲೆಯಂತೆ ಪಾನಮಾಡಲ್ಪಟ್ಟ, (ಚಂದ್ರನಲ್ಲಿರುವ 16 ಕಲೆಗಳಲ್ಲಿ 16ನೆಯ ಕಲೆಯು ಕ್ಷಯವೃದ್ಧಿಗಳಿಲ್ಲದ ಬೀಜಕಲೆ, ಹಾಗಿರುವುದರಿಂದ ಶುಕ್ಲಪಕ್ಷದಲ್ಲಿ ದಿನಕ್ಕೊಂದು ಕಲೆಯಂತೆ ವೃದ್ಧಿ ಹೊಂದಿ ಹುಣ್ಣಿಮೆಗೆ ಪೂರ್ಣನಾಗುತ್ತಾನೆ).

30*a* **स्वस्ति ते अस्तु** ಇಲ್ಲಿ '**नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च**' ಎಂಬ ಸೂತ್ರದಿಂದ **ते** ಎಂಬುದು ಚತುರ್ಥ್ಯಂತವಾಗಿದೆ.

30*b* **अस्तु स्ताम् सन्तु, एधि स्तम् स्त, असानि असाव असाम, अस्**—ಇರು, 2ನೆಯ ಗಣ, ಲೋಟ್, ಪ್ರ. ಏ.

31 **अर्दति**—ಬೇಡುತ್ತದೆ. **दुह्याच्पच्**—ಇತ್ಯಾದಿಕಾರಿಕಾನುಸಾರವಾಗಿ ದ್ವಿಕರ್ಮಕ, '**अम्बु**' ಎಂಬುದು ಔಚಿತ್ಯದಿಂದ ಪ್ರಧಾನ ಕರ್ಮವಾಗಿ ಅಧ್ಯಾಹಾರ್ಯವಾಗಿರುತ್ತದೆ.

32 **प्रतियातुं+कामः=यस्य ; तं**='**तुं काममनसोरपि**' ಎಂಬ ಕಾರಿಕಾನುಸಾರವಾಗಿ **काम** ಉತ್ತರಪದವಾಗಿದ್ದುದರಿಂದ ಪೂರ್ವ ಪದ **तुम्** ಪ್ರತ್ಯಯದ ಮಕಾರಕ್ಕೆ ಲೋಪಬಂದಿರುತ್ತೆ.

33 **किम् परिमाणं अस्येति-कियत्**—(ತದ್ಧಿತವೃತ್ತಿ).

34*a* **अन्वयुङ्क्त**—ಪ್ರಶ್ನಿಸಿದನು. **दुहादित्वात् द्विकर्मकत्वम्** '**युजिर्-योगे**' ಎಂಬ ಏಳನೆಯ ಗಣದ ಧಾತುವಿನ **लङ्**-ಆತ್ಮನೇ ಪದ, ಪ್ರ. ಏ.

34*b* **वर्णी**—ಬ್ರಹ್ಮಚಾರಿಯಾದ, '**वर्णाद्ब्रह्मचारिणि**' ಎಂಬ ಸೂತ್ರದಿಂದ **वर्ण** ಶಬ್ದದ ಮೇಲೆ ಅರ್ಥವಿಶೇಷದಲ್ಲಿ ಮತ್ವರ್ಥಕ-**इन्** ಪ್ರತ್ಯಯ ಬಂದಿದೆ. (ತ. ವೃ).

संख्या.

35 विद्यानांपरिसंख्यया, अङ्गानि वेदाश्चत्वारो मीमांसा न्याय-
विस्तरः। पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥

36 चतस्रः—ರೇಫಾಂತಃ ಸ್ತ್ರೀಲಿಂಗಃ ಚತುರ್‌ಶಬ್ದಃ ನಿತ್ಯಬಹುವಚನಾಂತಃ.

37 श्रुतनिष्क्रयस्य—ವಿದ್ಯೆಗಳ ಪ್ರತಿಮೂಲ್ಯದ.

38 एनो निवृत्तेन्द्रियवृत्ति—ಪಾಪವಿಲ್ಲದ ಇಂದ್ರಿಯ ವ್ಯಾಪಾರವುಳ್ಳ.
एनः=ಪಾಪ.

39 श्रुतानां पारं दृष्टवान् — पारदृश्वा = ವಿದ್ಯಾಪಾರಂಗತನಾದ.
(ಕೃ. ವೃ.) आत्मन् ಶಬ್ದದಂತೆ ನಡೆಯುತ್ತದೆ.

40 अन्यो वदान्यः वदान्यान्तरं—ಬೇರೊಬ್ಬ ದಾತೃವನ್ನು (ಮಯೂರವ್ಯಂಸಕಾದಿ ಸಮಾಸ).

41 'मा भूत्' न माङ्योगे ಎಂಬ ಸೂತ್ರದಿಂದ. (ಧಾತುಪೂರ್ವದ अ ಕಾರಾಗಮಕ್ಕೆ ಲೋಪ.)

42 द्वेवा त्रीणि वा = द्वित्राणि—ಸಂಖ್ಯೋಭಯಪದ ಬಹುವ್ರೀಹಿ.

43 प्रत्यग्रहीत्—ग्रह उपादाने—ಧಾತುವಿನ ಲುಙ್‌ರೂಪದ ಪ್ರ. ಪು. ಏ.ವ. अग्रहीत् अग्रहीष्टाम् अग्रहीषुः ಇತ್ಯಾದಿ.

44 मरुतः सखा मरुत्सखः 'राजाहःसखिभ्यष्टच्' ಎಂಬ ಸೂತ್ರದಿಂದ ಸಮಾಸಪದವು ಅಕಾರಾನ್ತವಾಗಿದೆ.

45 अधिशिश्ये रथं 'अधिशीङ्स्थासां कर्म' ಎಂಬುದರಿಂದ ಆಧಾರಕ್ಕೆ ಕರ್ಮಸಂಜ್ಞೆ ಬಂದಿದೆ.

46 जेतुं इच्छतीति—जिगीषुः.

47 कामान् सूते इति कामसूः—ಇಷ್ಟಗಳನ್ನು ಕೊಡುವ. स्वयंभू ಶಬ್ದದಂತೆ ನಡೆಯುವುದು.

48 मनीषितं द्यौरपि येन दुग्धा, 'अप्रधाने दुहादीनां प्रधाने नीहृकृष्वहां' ಕಾರಿಕೆಯಿಂದ ಗೌಣಕರ್ಮವಾದ द्यौः ಎಂಬುದು ಪ್ರಥಮಾಂತವಾಗಿದೆ.

49 अधिजगाम—अधिजग्मिवान्, सेदिवस् ಶಬ್ದದಂತೆ ನಡೆಯುತ್ತದೆ.

50 प्रतीयाय—ಹೊಂದಿದನು. इण्गतौ ಧಾತುವಿನ ಲಿಡ್ರೂಪ. ಪರ. ಪ್ರ. ಏ. इयाय ईयतुः ईयुः—ಇತ್ಯಾದಿ.

51 ब्रह्मणः अयं = ब्राह्मः ब्रह्मदेवताकः अभिजिन्नामकः त्रिंशन्मुहूर्तेषु मैत्रादिष्वेकतमः.

संख्या.

52 कुमारेण ईषत्सदृशः = कुमारकल्पः = ಷಣ್ಮುಖನಿಗೆ ಸಮಾನ ನಾದ. ईषदसमाप्तौ कल्पप् देश्य देशीयरः—ಎಂಬ ಸೂತ್ರದಿಂದ कल्प ಪ್ರತ್ಯಯ ಬಂದಿರುತ್ತೆ. (ತ. ವೃ).

53 निसर्गादागतं नैसर्गिकं—ಸಹಜವಾದ (ತ. ವೃ).

54 बिभिदे—भिद विदारणे लिटि आ. प. ಇದು ಕರ್ಮಕರ್ತರಿ ಪ್ರಯೋಗ.

55 'क्रथकैशिक' ಎಂಬುದು ವಿದರ್ಭದೇಶವಾಚಕ ಪರ್ಯಾಯಪದ.

56 स्वसुः—ಧಾತೃ ಶಬ್ದದಂತೆ ನಡೆಯುತ್ತೆ. ಆದರೆ ದ್ವಿ. ಬ. स्वसॄः (ಸ್ತ್ರೀಲಿಂಗ).

57 राजानः धीयन्ते अस्यामिति राजधानी—(ಕೃ. ವೃ). ರಾಜ ನಗರ.

58 वने भवाः वन्याः इतरे येषां ते वन्येतराः — ನಾಗರಿಕರ ವಿಶ್ರಾಂತಿಗೆ ಅರ್ಹಗಳಾದ, ಬಹುವ್ರೀಹಿ ಸಮಾಸ ಮಾಡಿರುವು ದರಿಂದ ಸರ್ವನಾಮ ಸಂಜ್ಞೆಯಿಲ್ಲ. ರಾಮಶಬ್ದದಂತೆಯೇ ನಡೆ ಯುವುದು.

59 जानपदोपदाभिः—ಅಕ್ಕಪಕ್ಕಗಳ ದೇಶದ ಜನರಿಂದೊಪ್ಪಿಸಲ್ಪಟ್ಟ ಕಾಣಿಕೆಯ ವಸ್ತುಗಳಿಂದ.

60 उद्यानविहारकल्पाः—राजोद्यानस्थविश्राममन्दिरसदृशाः ಉದ್ಯಾನವನದ ಕ್ರೀಡಾಗೃಹಕ್ಕೆ ಸಮಾನವಾದ, उद्यानविहारेण ईषत्सदृशाः—विहारकल्पाः (ತ. ವೃ).

61*a* दान—ಮದೋದಕ.

61*b* सरित्तः—ನದಿಯ ದೆಸೆಯಿಂದ, 'पञ्चम्यास्तसिः' ಎಂಬುದರಿಂದ ಪಂಚಮ್ಯರ್ಥದಲ್ಲಿ 'तस्' ಪ್ರತ್ಯಯ ಬಂದಿದೆ.

62 वप्रक्रिया—ದಂತಗಳಿಂದ ತಿವಿಯುವ ಆಟ.

63 वार्यर्गलाभङ्गे—ಕಟ್ಟುವ ಕಂಭದ ಗಡಾರಿಯನ್ನು ಮುರಿಯಲು, वारी तु गजबन्धने ಎಂದು ಅಮರಕೋಶ.

64 मदुर्दिनश्रीः—ಮದಜಲವೃಷ್ಟಿಯು.

65 सप्त + छदाः यस्य सः = सप्तच्छदः—ಏಳೆಲೆ ಕರ್ಪೂರಬಾಳೆ ಗಿಡ

66 युगं वहन्तीति = युग्याः—ಗಾಡಿ ಎಳೆಯುವ ಕುದುರೆಗಳು. छिन्नः बन्धः यैस्ते = छिन्नबन्धाः द्रुताः युग्याः यस्मिन् सः (ಬ. ಸ).

67 भग्नाः + अक्षाः येषां ते = भग्नाक्षाः—ಎರಡು ಚಕ್ರಗಳಲ್ಲೂ ಹಾಯುವ ಕಬ್ಬಿಣದ ಅಚ್ಚು ಮುರಿದಿರುವ.

सङ्ख्या.

68 विहस्ताः—ಚಿಂತಾಕ್ರಾಂತರಾದ.

69 वधं अर्हति वध्यः—ಕೊಲ್ಲಲು ಯೋಗ್ಯವಾದ, न वध्यः अवध्यः 'लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्यात् इयं हि श्रीः' ये करिणः ಎಂಬುದಾಗಿ ನೀತಿ.

70 प्रभावोपनतैः—स्वीयमहिमातिशयेन सम्पादितैः — ತನ್ನ ಸತ್ವವಿಶೇಷದಿಂದ ಸಂಪಾದಿಸಲ್ಪಟ್ಟ.

71*a* वाचः प्रशस्ताः अस्य सन्तीति = वाग्मी—ಒಳ್ಳೆಯ ಮಾತಾಳಿಯಾದ (ತ. ವೃ.) 'वाचो ग्मिनिः' ಎಂಬ ಸೂತ್ರದಿಂದ ग्मिन् ಪ್ರತ್ಯಯು ಬಂದಿರುತ್ತೆ.

71*b* प्रियं वदतीति प्रियंवदः—'प्रियवशेवदः खच्' 'खित्यनव्ययस्य' ಎಂಬ ಸೂತ್ರಗಳಿಂದ ಪ್ರತ್ಯಯಾಗಮಗಳು ಬಂದಿವೆ.

72 गन्धर्वो देवता अस्येति — गान्धर्वं—(ತ. ವೃ.) ಗಂಧರ್ವ ದೇವತಾಕವಾದ.

73 आदत्स्व—दत्तां ददातां ददतां इत्यादि. दाञ् दाने—ಮೂರನೆಯ ಗಣ, ಆಜ್ಞಾರ್ಥ, ಮ. ಪು. ಏ. ವ.

74 अलं ह्रिया—'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' ಎಂಬಂತೆ ಇಲ್ಲಿ ತೋರುವ ಸಾಧನಕ್ರಿಯೆಗೆ ಕರಣವಾದ್ದರಿಂದ ತೃತೀಯಾ ಬಂದಿರುತ್ತೆ. ಲಜ್ಜೆಯಿಂದ ಪ್ರಯೋಜನವಿಲ್ಲವೆಂದರ್ಥ.

75 आसेदतुरिति—आसेदिवांसौ (ಕೃ. ವೃ.) ವಿದ್ವತ್ ಶಬ್ದದಂತೆ.

76 शोभनः राजा यस्मिन् सः—सुराजा, सुराज्ञो भावः सौराज्यं (ಬ.ಸ, ತ.ವೃ.) ಒಳ್ಳೆಯ ರಾಜನ ಆಳ್ವಿಕೆ.

77 अर्पिता श्रीः यस्मै सः अर्पित श्रीः—ಅರ್ಪಿಸಲ್ಪಟ್ಟ ಐಶ್ವರ್ಯವುಳ್ಳ.

78 दशां अध्युवास = उपान्वध्याङ्वसः ಎಂಬ ಸೂತ್ರದಿಂದ ವಾಸಾಧಾರ ವಾಚಕ ದಶಾಪದಕ್ಕೆ ಕರ್ಮಸಂಜ್ಞೆ ಬಂದಿದೆ.

79 कन्यासु ललाम कन्याललाम—ಕನ್ಯಾರತ್ನವನ್ನು (ಸ. ತ).

80 लब्धुमिच्छुः लिप्सुः, लभेः सन्नन्तादुप्रत्ययः.

81 भावावबोधे कलुषा—ಅಜನ ಅಭಿಪ್ರಾಯ ತಿಳಿಯಲು ಅಸಮರ್ಥಳಾದ.

82 द्वाभ्यां विदाभ्यां = द्विधा—ಎರಡು ವಿಧವಾಗಿ (ತ.ವೃ.) ಅವ್ಯಯ, ಇಬ್ಬರಲ್ಲಿಯೋ ಎಂದು ತಾತ್ಪರ್ಯ.

संख्या.

83 बिभर्ति— ನಿರ್ವಹಿಸುತ್ತಾನೆ. भृञ्धारणपोषणयोः इति,बिभर्ति बिभृतः बिभ्रति इत्यादि.

84 धुरं वहतीति धुर्यं, धुर्यं च तत् पदं च धुर्यपदं, भारनिर्वहणास्पदं— ಹೊರೆ ಹೊರುವ ಸ್ಥಾನ.

85 भवतापि—ನಿನ್ನಿಂದಲೂ. प्रसितोत्सुकाभ्यां तृतीयान्यतरस्यां इति सूत्रात् तृतीया.

86 खण्डितेव—ಅಸಹನೆಯಿಂದ ಕೋಪಗೊಂಡ ಸ್ತ್ರೀಯಂತೆ. ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्या कषायिता ' इति.

87 विजहाति—ಬಿಡುತ್ತಾನೆ. ओ-हाक् त्यागेः जुहोत्यादिः (3ನೆಯ ಗಣ) जहाति, जहितः, जहीतः, जहति इत्यादि.

88 लब्धपरभागतया — ಹೊಂದಲ್ಪಟ್ಟ ಹೊಳಪುಳ್ಳ. परभागस्थाळथळयम् .

89 अधरश्चासावोष्ठश्च अधरोष्ठः ' ओत्वोष्ठयोः समासे वा, इति पररूपम्.

90 आक्रमते—' आङ उद्गमने ' इति सूत्रादात्मनेपदम्.

91 छिनत्ति छिन्तः छिन्दन्ति इत्यादि रुधादिः (7ನೆಯ ಗಣ) लट्.

92*a* उभौ च तौ पक्षौ च उभयपक्षौ ' उभादुदात्तो नित्यं ' इति नित्यग्रहणसामर्थ्यात् वृत्तिविषये उभयशब्दस्यैव प्रयोगः—ಸಮಾಸದೊಳಗೆ ಸೇರಿದ ಉಭಶಬ್ದಕ್ಕೆ ಉಭಯಾದೇಶ ಬರುತ್ತದೆ.

92*b* मुखरशृङ्खलकर्षिणः—ಏಳುವುದು ಮತ್ತು ಮುಂದಿನ ಕಾಲುಗಳನ್ನು ಎತ್ತಿಟ್ಟು ಓಲಾಡುವುದರಿಂದ ಶಬ್ದಮಾಡುವ ಕಾಲುಸರಪಣಿಗಳುಳ್ಳ

93 गैरिकं—ಸಹಜವಾದ ನಾನಾ ವರ್ಣವುಳ್ಳ ಪರ್ವತಸಾರ (ಮಣ್ಣುಶಿಲೆ, ಕಾವಿ ಇತ್ಯಾದಿ).

94 मलिनानि कुर्वन्ति मलिनयन्ति — ' तत्करोती ' त्यादिण्यन्ताल्लट् ಸನಾದ್ಯಂತ ಧಾತುವೃತ್ತಿ.

95 विरलभक्तिः—ದಾಟುದಾಟಾದ ರಚನಾವಿಶೇಷವುಳ್ಳ.

96 सुप्रतीकः—ಸುಪ್ರತೀಕವೆಂಬ ಐಶಾನೀ ದಿಗ್ಗಜವು.

97 अगात् अगातां अगुः, इत्यादि ' इणो गा लुङि ' इण्धातोः अदादेः लुङि ' गा ' आदेशः.

श्रीकृष्णजन्मवृत्तान्तः

संख्या.

1 सात्—परमात्मा, सोऽस्यास्तीति सात्वान्, सात्वतो वा परमभागवत इत्यर्थः.

2 शरीरं अस्याः अस्तीति—शरीरिणी–दृश्यमानशरीरनिमित्ता (शरीरावयवोच्चरितेत्यर्थः). सा न भवतीति अशरीरिणी—अज्ञायमानवक्तृतया श्रूयमाणा.

3 भर्त्रा सह—सहयोगेऽप्रधाने, इति तृतीया.

4 प्राणान्—नित्यबहुत्ववाची, पुंसि भूम्न्यसवः प्राणाः इत्यमरः.

5 वज्रपाताहत इव—ಸಿಡಿಲು ಬಡಿದವನಂತೆ, (ಮೈಮರೆತು ನಿಶ್ಚೇಷ್ಟನಾದ) गगनतलादतर्कितमुपनतेन अशनिघातेन यथा आहतः सद्यः अचेतनो मूढश्च भवति—तद्वदिति भावः.

6 जघान जघ्नतुः जघ्नुः इत्यादि, हन हिंसागत्योः अदादेर्लिटि रूपम्.

7 भूरिभारेण—दुर्भरेण भारेण, पापभारेणेति यावत्.

8 त्रिदिवं ओकः येषां ते—ದೇವತೆಗಳ वेधस् शब्दवत् रूपम्.

9 अश्रुपातेन सह वर्तते यस्मिन् कर्मणि तत् यथा—ಕಣ್ಣೀರು ಸುರಿಸುತ್ತಾ.

10 अहनि च निशा च अहर्निशम्—ಹಗಲು ರಾತ್ರಿಗಳಲ್ಲೂ.

11 अवसीदामि—ಬಳಲುತ್ತೇನೆ.

12 बिभर्तुमलम्—ಧರಿಸಲು ಸಮರ್ಥಳು. शक्तिवाचकालंशब्देन योगात् 'नमः स्वस्ती'त्यादिना चतुर्थ्यर्थे तुमुन्.

13 जगन्मयम्—ಪ್ರಪಂಚವೇ ಶರೀರವಾಗಿ ಉಳ್ಳ.

14 भुवो भारावतारणार्थम्—ಅಧರ್ಮವನ್ನು ನಿರ್ಮೂಲಮಾಡಲೋಸ್ಕರ (ದುಷ್ಟನಿಗ್ರಹದಿಂದ ಆಗುವ ಫಲವೇ ಇದು).

15*a* धर्मस्थितिम्—ಸಾಂಕರ್ಯವೂ, ಕ್ಷೀಣತೆಯೂ ಬರದಂತೆ ಧರ್ಮ ರಕ್ಷಣೆಯನ್ನು.

15*b* श्रुत्यर्थगर्भितेन—ವೇದಮಂತ್ರದಲ್ಲಿ ಹೇಳಲ್ಪಟ್ಟ ಮಹತ್ವವನ್ನೊಳಗೊಂಡ, स्तोत्रेण–ಸ್ತುತಿಯಿಂದ.

संख्या.

16 जानाति, जानीतः, जानन्ति इत्यादि, ज्ञा-अवबोधने ಎಂಬ 9ನೇ ಗಣದ ಧಾತುವಿನ ಲಟ್ ಪರ. ಪ.

17*a* सितकृष्णौ केशौ—ಆದಿಶೇಷನು ಶುಭ್ರನಾದುದರಿಂದ ಶೇಷಾಂಶವು 'सितकेश' ವೆಂಬುದಾಗಿಯೂ ವಿಷ್ಣುವು ನೀಲವರ್ಣನಾದುದರಿಂದ ವಿಷ್ಣ್ವಂಶವು 'कृष्णकेश' ಎಂಬುದಾಗಿಯೂ ಹೇಳಲ್ಪಟ್ಟದೆ.

17*b* महासुरैः—ಕಾಲನೇಮಿ ಮುಂತಾದ ರಾಕ್ಷಸರೊಡನೆ. ವ್ಯಾ. ಸಮಾನಾಧಿಕರಣ, ತತ್ಪುರುಷ, ಬಹುವ್ರೀಹಿಗಳಲ್ಲಿ ಪೂರ್ವಪದವಾಗಿ ಸೇರಿದ ಮಹತ್ ಶಬ್ದವು ಆಕಾರಾನ್ತವಾಗುವುದು.

18 करोतु, कुरुतां, कुर्वन्तु, इत्यादि 'कृ' ಮಾಡು 8ನೇಗಣ, ಆಜ್ಞಾರ್ಥ.

19 गमयिता—ಹೊಂದಿಸುವವನು. ಪ್ರೇರಣಾರ್ಥಕರೂಪ, ಭವಿಷ್ಯತ್ಕಾಲ (लुट्).

20 मेरुपृष्ठम्—ಸ್ವರ್ಗಲೋಕವನ್ನು ಕುರಿತು.

21 जगाम, जग्मतुः जग्मुः, इत्यादि 'गम्'—ಹೋಗು ಧಾತುವಿನ ಲಿಡ್ರೂಪ.

22 प्रतिज्ञातं अनतिक्रम्य-यथाप्रतिज्ञातम्—ಪ್ರತಿಜ್ಞಾನುಸಾರವಾಗಿ. अनतिक्रमणे अव्ययीभावसमासः.

23*a* षट् 'ष' ಕಾರಾಂತಃ ನಿತ್ಯಬಹುವಚನಃ ಷಟ್ಛಬ್ದಃ.

23*b* मङ्गलावसरे—ಜನ್ಮೋತ್ಸವಸಮಯದಲ್ಲಿ.

24 आपन्नसत्वा—ಗರ್ಭಿಣಿಯಾದ.

25 शशाक, शेकतुः, शेकुः इत्यादि 'शक्' ಸಮರ್ಥನಾಗು 5ನೆಯ ಗಣ, ಲಿಟ್ ರೂಪ, ಪರ. ಪದ.

26 तुष्टाव, तुष्टुवतुः, तुष्टुवुः इत्यादि स्तु—ಸ್ತುತಿಸು ಧಾತುವಿನ ಲಿಡ್ರೂಪ.

27 चकार, चक्रतुः, चक्रुः इत्यादि ; जगौ, जगतुः, जगुः इत्यादि—'कृ' ಮಾಡು, गै—ಹಾಡು ಧಾತುಗಳ ಲಿಡ್ರೂಪ, ಪರ. ಪದ.

28 श्रीवत्सः वक्षसि यस्य—ಶ್ರೀವತ್ಸವೆಂಬ ದಿವ್ಯ ಚಿಹ್ನೆಯೇ ಎದೆಯಲ್ಲುಳ್ಳ.

29 कंसाद्भीतः—'भीत्रार्थानां भयहेतुः' ಭಯಾರ್ಥಕಶಬ್ದಯೋಗವಿದ್ದಲ್ಲಿ ಭಯಹೇತುವಾಚಕಶಬ್ದಕ್ಕೆ ಅಪಾದಾನ ಸಂಜ್ಞೆ ಬರುತ್ತದೆ.

30 ಸತಿಸಪ್ತಮೀ ವಿಭಕ್ತಿಯು ಪ್ರಧಾನಕ್ರಿಯೆಗೆ ಕಾರಣವೋ ಅಥವಾ ಜ್ಞಾಪಕವೋ ಆಗುವ ಗೌಣಕ್ರಿಯಾವಾಚಕ ವಿಶೇಷಣ ತದ್ವಿಶೇಷ್ಯ

संख्या.

ಗಳ ಮೇಲೆ ಬರುತ್ತದೆ. ವಿಶೇಷ್ಯಕ್ಕೆ ಸೇರಿದಾಗ ಪ್ರಥಮಾವಿಭಕ್ತ್ಯರ್ಥವೂ ವಿಶೇಷಣಕ್ಕೆ ಸೇರಿದಾಗ ಇರಲು, ವಾ ಇರಲಾಗಿ ಎಂಬರ್ಥವೂ ಇದರಿಂದ ತಿಳಿಯಲ್ಪಡುತ್ತದೆ. ಉದಾ—
जले पीते सति तृष्णा शाम्यति, गोषु दुह्यमानासु गतः.

31 नानावर्तसमाकुला—ಅನೇಕ ಸುಳಿಗಳಿಂದ ಕೂಡಿದ.

32 जानुदघ्नजला—ಮೊಳಕಾಲುದ್ದ ನೀರುಳ್ಳ. जानु परिमाणं अस्येति जानुदघ्नम्, तादृशं जलं यस्याः सा 'प्रमाणे द्वयसच् दघ्नञ्' इत्यादिना 'दघ्नञ्' प्रत्ययः.

33 वहति स्म—अवहत् इत्यर्थः, 'लट् स्मे' इति भूतार्थे वर्तमानलकारः.

34 सन्नकण्ठया—ಕುಗ್ಗಿದ ಕಂಠಸ್ವರವುಳ್ಳ.

35 वियति—ಆಕಾಶದಲ್ಲಿ 'त' ಕಾರಾಂತ ನಪುಂಸಕಶಬ್ದ.

36a अब्रवीत् अब्रूतां अब्रुवन् इत्यादि ब्रू=ಹೇಳು. 2ನೇ ಗಣ, ಅನ ಭೂ. ಕಾಲ.

36b सम्प्रधार्य—ನಿಶ್ಚಯಿಸಿ (ತೀರ್ಮಾನಿಸಿ).

37 भोजराजस्य 'राजाहः सखिभ्यष्टच्' इति समासान्तष्टच्प्रत्ययः.

38 दर्शनस्य पन्थाः दर्शनपथः—'ऋक्पूरब्धूः पथामानक्षे' इति समासान्तः अच्' 'अन्तर्धौ येनादर्शनमिच्छति' इत्यपादानत्वात् पञ्चमी च.

39 उद्विग्नं मनः यस्य सः—ಕಂಗೆಟ್ಟ ಮನಸ್ಸುಳ್ಳ.

40 तृणायमन्ये—'मन्यकर्मण्यनादरे विभाषाप्राणिषु इति सम्प्रदानत्वाच्चतुर्थी.

41 छिद्रेषु—ವಂಚನೆಗಳಿಂದ.

42a जरासन्धात् ऋते—'अन्यारादितरर्ते' इत्यादिना पञ्चमी.

42b अवज्ञा—ಅನಾದರವು, 'ज्ञा' ಧಾತುವು ತಿಳಿ ಎಂಬರ್ಥವುಳ್ಳುದಾದರೂ 'अव' ಉಪಸರ್ಗಬಲದಿಂದ ಅನಾದರಾರ್ಥಬೋಧಕವಾಗಿರುತ್ತೆ. ಕಾ. उपसर्गेण धात्वर्थो बलादन्यत्प्रतीयते। प्रहाराहारसंहारविहारपरिहारवत् ॥ ಉಪಸರ್ಗಸಂಬಂಧದಿಂದ ಬೇರೆ ಅರ್ಥವೂ, ವಿರುದ್ಧಾರ್ಥವೂ, ಧಾತ್ವರ್ಥಪುಷ್ಟಿಯೂ ಧಾತ್ವರ್ಥದ ಒಳಭೇದಗಳೂ, ಸಕರ್ಮಕಾಕರ್ಮಕವ್ಯತ್ಯಾಸವೂ,

ಸಂಖ್ಯಾ.

ಪರ-ಆತ್ಮನೇಪದವ್ಯತ್ಯಾಸವೂ, ಇತ್ಯಾದಿ ಬದಲಾವಣೆಗಳಾಗುವುವು. (ಉದಾಹರಣೆಗಳನ್ನು ಉಪಾಧ್ಯಾಯರು ವಿವರಿಸಿ ತಿಳಿಸಬೇಕು).

43 धर्मे परायणाः—ಧರ್ಮದಲ್ಲೇ ಪರಮಧ್ಯೇಯಬುದ್ಧಿಯುಳ್ಳ ಅಥವಾ ಧರ್ಮದಲ್ಲೇ ಏಕಾಗ್ರಚಿತ್ತವುಳ್ಳ.

44 यज्विनः—ವಿಧಿವತ್ತಾಗಿ ಯಾಗಮಾಡಿದ (ದೀಕ್ಷಿತರು).

45 उद्रिक्तबलानां—ವಿಶೇಷ ಬಲಪುಷ್ಟಿಚಟುವಟಿಕೆಗಳುಳ್ಳ.

बाललीला

ಸಂಖ್ಯಾ.

1 दिष्ट्या—साधु साधु (अव्ययम्) ಭೇಷ್, ಶಹಬಾಸ್ ಎಂದರ್ಥ.

2 गम्यताम्—ಹೋಗೋಣಾಗಲಿ, ಭಾವಾರ್ಥಕರೂಪ, ಆಜ್ಞಾರ್ಥ. देशकालाध्वगन्तव्यान्यस्य कर्मणोऽभावादकर्मकत्वम्.

3 वक्तुमयुक्तमपि—ಕಂಸನಿಂದ ಮರೆಮಾಚಿ ತರಲ್ಪಟ್ಟುದರಿಂದ ಕೃಷ್ಣ ಬಾಲನಿಗೆ ಸಂಬಂಧಪಟ್ಟುದೆಲ್ಲವೂ ಗೋಪ್ಯವಾಗಿರಬೇಕಾದಪ್ರಯುಕ್ತ ವಾಚಾ ತದ್ವಿಚಾರೋದ್ಘಾಟನೆಯು ಅನುಚಿತವೆಂದಾಶಯ.

4 रोहिणीप्रसवः—ರೋಹಿಣೀದೇವಿಯಲ್ಲಿ ಹುಟ್ಟಿದ, ರೋಹಿಣೀನಕ್ಷತ್ರ ದಲ್ಲಿ ಹುಟ್ಟಿದ, (ರಾಮಕೃಷ್ಣರಿಬ್ಬರೂ ರಕ್ಷಣಾರ್ಹರು. ಶ್ಲೇಷ ವ್ಯಾಜದಿಂದ ಕೃಷ್ಣನೂ ರಕ್ಷಣೀಯನು ಎಂದಾಶಯವು ತಿಳಿಸು ಲ್ಪಟ್ಟಿರುವುದು).

5 निवसतां तेषाम्—ನೆಮ್ಮದಿಯಿಂದ ವಾಸಿಸುವ ಗೋಪರನ್ನು ಅನಾ ದರಿಸಿ 'षष्ठी चानादरे' इत्यनेन सत्षष्ठी.

6 विच्छिन्नानि स्नायूनां बन्धनानि यस्याः सा—ಕಿತ್ತುಹೋದ ನರಗಳ ಕೀಲುಗಂಟುಗಳುಳ್ಳ.

7 विह्वलाः—ಕಂಗೆಟ್ಟವರಾದ.

8 व्रजौकसः—ಗೋಕುಲವಾಸಿ ಗೊಲ್ಲರೆಲ್ಲರೂ.

9 ददर्श ददृशतुः ददृशुः इत्यादि दृश्—ನೋಡು ಇದರ ಲಡ್ರೂಪ.

10 प्रतिहतम्—ತೊಲಗಿತು.

11 बालदोषम्—ಕಣ್ಣಾಸರೆ, ಗ್ರಹಾದಿ ಭೀತಿ ಮುಂತಾದ ದೋಷವನ್ನು.

संख्या.

12 गोकरीषम्—ಹಸುವಿನ ಒಣಗಿದ ಸಗಣಿಯನ್ನು.

13 उत्तानः शेते इति उत्तानशायी—ಬೆನ್ನಡಿಯಾಗಿ ಮಲಗಿರುವ.

14 संस्कारान्—ಅನ್ನಪ್ರಾಶನಾದಿ ಕರ್ಮಗಳನ್ನು (ಶಿಶು ಸಂಸ್ಕಾರಕ ಕರ್ಮಗಳು).

15 जानू च करौ च एषां समाहारः जानुकरम्—ಸಮಾಹಾರ ದ್ವಂದ್ವ, ಅದು ನಪುಂಸಕ ಏ. ವ. घृष्टं जानुकरं ययोस्तौ—ತೊಡೆ ತೋಳುಗಳಿಂದ ತೆವಳುವವರಾಗಿಯೂ.

16 ऐष्ट, ऐशातां, ऐशत इत्यादि ईश् ಆಳು, 2ನೇಗಣ, ಅನ. ಭೂ. ಆತ್ಮನೇಪದ.

17 शक्नोति, शक्नुतः, शक्नुवन्ति इत्यादि, शक्—ಸಮರ್ಥನಾಗು. 5ನೇ ಗಣ, ವರ್ತ. ಪರ.

18 व्यग्राम्—ತೊಡಗಿದವಳನ್ನು (ಆಸಕ್ತಳಾಗಿರುವುದನ್ನು).

19 दाम्ना—ಹಗ್ಗದಿಂದ, नामन् ಶಬ್ದದಂತೆ ರೂಪ ನಡೆಯುತ್ತೆ.

20 निरैक्षन्त—ದೃಷ್ಟಿಸಿ ನೋಡಿದರೊ. ईक्ष्=ನೋಡು, 1ನೇ ಗಣ. ಅನ. ಭೂ. ಆ. ಪದ.

21 महोत्पातेभ्यो भीरवः, भियः क्रुक्लुकनौ, इति क्रुप्रत्ययः.

22 उद्विग्नाः—ಗಾಬರಿಗೊಂಡವರಾಗಿ.

23 शकटी वाटः पर्यन्तः यस्य सः ಬಂಡೀ ಚೌಕವೇ ಅವಧಿಯುಳ್ಳದುದಾಗಿ.

24 सप्तवर्षदेशीयौ—ಸುಮಾರು ಏಳು ವರ್ಷ ವಯಸ್ಸುಳ್ಳ. ईषद्समाप्ताः सप्त वर्षा अनयोः, ताद्धितार्थद्विगुः.

25 बर्हिपत्रकृतापीडौ—ನವಿಲುಗರಿಗಳ ಅಲಂಕಾರವುಳ್ಳವರಾದ.
इमानि चत्वारि विशेषणद्वन्द्वानि पूर्वविशेषणार्थोपस्कृतोत्तरविशेषणकानि अर्थतो वाच्यानि. ಜೋಡಿ ವಿಶೇಷಣಗಳಾದ ಈ ಪದಗಳು ಪೂರ್ವ ವಿಶೇಷಣಾರ್ಥದಿಂದ ಸಹಕರಿಸಲ್ಪಟ್ಟ ಉತ್ತರವಿಶೇಷಣಾರ್ಥಗಳುಳ್ಳವು.

26 कदम्बकस्रक्चित्रौ—ಕಡಹದ ಮರದ ಹೂಗಳಿಂದ ಅಲಂಕೃತರಾಗಿ.

27 पर्णशय्यामधिशयानौ — अधिशीङ्स्थासां कर्म इत्याधारस्य कर्मत्वम् .

28 रामं विना—'पृथग्विना' इत्यादिना विनाशब्दयोगात् द्वितीया च कर्मत्वम्.

संख्या.

29 परिकरं—ನಡುಕಟ್ಟನ್ನು.

30 आस्फोटयामास—ಅಪ್ಪಳಿಸಿದನು.

31 शतात् पराः परश्शताः—ನೂರಾರುಜನ.

32 नागानां राजा नागराजः.

33 त्वरतां, त्वरेतां, त्वरन्तां, इत्यादि. त्वर् ಆತುರಪಡು, ಆಜ್ಞಾರ್ಥ, ಆ. ಪ.

34 इति कर्तव्यतामूढाः—ಹೀಗೆ ಮಾಡಬೇಕೆಂದರಿಯದ.

35 दादातु, दत्तां, ददतु। इत्यादि. दा—ಕೊಡು, 3ನೆಯ ಗಣ ಆಜ್ಞಾರ್ಥ, ಪ್ರ. ಏ.

36 अवतस्थे—'समवप्रविभ्यःस्थः' इत्यनेन आत्मनेपदम्.

37 सगद्गदं—ಬಿಕ್ಕಳಿಸುತ್ತಾ.

38 विना वृषेण 'पृथग्विने' त्यादिना तृतीया.

39 अवतारप्रयोजनं संस्मारितः—लीलापारवश्यभरेण स्व-स्वीयविस्मरणस्य सार्वत्रिकत्वादतो रामेणोद्बोधो हरेः एवं रामस्यापि समयविशेषे हरिणोद्बोधः.

ದುಷ್ಟನಿಗ್ರಹಾರ್ಥವಾಗಿ ತೊಡಗಿದ ಅದ್ಭುತಕಾರ್ಯ ಲೀಲಾವೇಶ ಭರದಿಂದ ತನ್ನನ್ನೂ ತನ್ನ ಮಹತ್ವವನ್ನೂ ಮರೆಯುವುದು ಸಾಮಾನ್ಯವಾಗಿ ರೂಢಿಯಲ್ಲಿರುವುದಾದ್ದರಿಂದ ರಾಮಕೃಷ್ಣರು ಇಂತಹ ಸಮಯದಲ್ಲಿ ಒಬ್ಬರಿಗೊಬ್ಬರು ಎಚ್ಚರಿಕೆ ಕೊಡುತ್ತಿದ್ದರು.

40 स्मितेन भिन्नौ ओष्ठयोः सम्पुटौ यस्य 'ओत्वोष्ठयोः समासे वा' इत्यनेन वृद्ध्यपवादः पररूपम्.

41 उरुः विक्रमो यस्य—ಬಲವಾದ ಪದನ್ಯಾಸವುಳ್ಳವನಾಗಿ.

42 दण्ड इव पतित्वा—दण्डपातम् (णमुलन्तमव्ययम्).

43 मन्थराः—मन्दीभूतगतयः (ನಿಧಾನವಾದ ನಡಗೆಯುಳ್ಳವರಾಗಿ)

44 अह्नि, अहनि, अह्नोः, अहस्सु। 'स' ಕಾರಾನ್ತಃ ಅಹಶ್ಶಬ್ದಃ ನಪುಂಸಕಲಿಂಗಃ.

45 यदि रुच्यते, अर्थात्तुभ्यमिति शेषः 'रुच्यर्थाना' मिति प्रीयमाणस्य सम्प्रदानत्वं, भावे प्रयोगः.

46*a* अभुक्तचरं—ಎಂದೂ ಮೇಯದಿರುವ, पूर्वं भुक्तं—भुक्तचरं 'भूतपूर्वे चरट्, इति चरप्रत्ययः। ततो नञ्समासः.

संख्या.

46b चचार, चेरतुः, चेरुः। चेरिथ, चेरथुः, चेर । चचार, चेरिव, चेरिम ॥ चर्=ತಿರುಗಾಡು, ತಿನ್ನು 1ನೆಯ ಗಣ, ಲಿಟ್. ಪರ. ಪ.

47 भाण्डीरवटं—ದೊಡ್ಡ ಪಣೆಯಾಲದ ಮರದ ಹತ್ತಿರಕ್ಕೆ.

48 क्ष्वेडमानौ—ಸಿಂಹನಾದಮಾಡುವವರಾಗಿ.

49 निर्योगपाशस्कन्धौ—ಕಟ್ಟುವ ಹಗ್ಗವೇ ಹೆಗಲಿನ ಮೇಲುಳ್ಳವರಾಗಿ.

50 स्यन्दोलिकाभिः—ತೂಗುಯ್ಯಾಲೆ ಆಟಗಳಿಂದ.

51 नियुद्धैः—ಬಾಹುಕುಸ್ತಿಗಳಿಂದ.

52 हरिणाक्रीडनं—ಜಿಂಕೆ ಆಟ (ಸೋತವರು ಸವಾರಿಹಾಕಿಕೊಂಡು ತಿರುಗಬೇಕಾದ ಪಂಥವುಳ್ಳ ಈ ಆಟದ ಮರ್ಮವನ್ನು ಶಿಕ್ಷಕರು ವಿವರಿಸಬೇಕು.)

53 व्यजयत—ಗೆದ್ದನು, 'विपराभ्यां जेः' इत्यनेनात्मनेपदम् ।

54 ह्रिये—ಅಪಹರಿಸಲ್ಪಡುತ್ತಿದ್ದೇನೆ. ಕರ್ಮಾರ್ಥಕರೂಪ.

55 स्वस्वरूपं—आदिशेषात्मताम् (ಶೇಷಾಂಶವೆಂಬುದನ್ನು).

56 हन्तु, हतां, घ्नंतु । जहि, हतं, हत । हनानि, हनाव, हनाम ॥ हन—ಕೊಲ್ಲು, ಅಜ್ಞಾರ್ಥ, ಪ. ಪ,

57 निष्कासितमस्तिष्कः—ಹೊರಡಿಸಲ್ಪಟ್ಟ ಮೆದುಳುಳ್ಳವನಾಗಿ.

58 क्षीरवत्यः—प्रभूतं क्षीरमासामस्तीति, भूमार्थे मतुप्.

59 वत्सवत्यः—प्रशस्ताः वत्सा आसां सन्तीति, प्रशंसायां मतुप्.

60 नासस्या नातृणा—ತಪ್ಪದೆ ಯಥೇಷ್ಟ ಪೈರು, ಹುಲ್ಲು ಇವುಳ್ಳದ್ದು. नञ्द्वयं प्रकृतमर्थं द्रढयति.

61 कृष्यन्ताः सीमाः—ಗ್ರಾಮಗಳ ಗಡೀಪ್ರದೇಶಗಳವರೆಗೆ ವ್ಯವಸಾಯ ಕ್ಷೇತ್ರವೂ, सीमसीमे स्त्रियामुभे, ಅಮರಕೋಶದಿಂದ सीमा ಅಕಾರಾನ್ತಶಬ್ದ.

62a चक्रचारिणः—ಗುಂಪಾಗಿ ಸಂಚರಿಸುವ.

62b द्वारबन्धावरणाः—ಕೂಪಕೂರ್ಮದಂತೆ ಮನೆಯ ಬಾಗಿಲು ಬಿಟ್ಟು ಹೊರಡದೆ ಇರುವ, (ಅನಂತ ದ್ರವ್ಯವ್ಯಯದಿಂದ ಕಟ್ಟಿಸಿದ ಗೃಹವಾಸದಲ್ಲೆ ಸದಾ ತೃಪ್ತರಾಗಿರುವ).

63 गृहक्षेत्रिणः—ಮನೆಯ ಹತ್ತಿರವೇ ಹೊಲಗದ್ದೆಗಳುಳ್ಳ.

64 सानुषु—ಬೆಟ್ಟದ ತಪ್ಪಲುಗಳಲ್ಲಿ, सानु ಉ ಕಾರಾನ್ತ ನಪುಂಸಕ ಲಿಂಗ.

संख्या.

65 मेध्यम्—ಪರಿಶುದ್ಧವಾದ.

66 संदोहः—ಕರಾವು (ಹಾಲು, ಮೊಸರು, ಬೆಣ್ಣೆಗಳು).

67 गोपहतकानां—ಅಲ್ಪರಾದ ಗೊಲ್ಲರ, कुत्सिताः गोपाः.

68 कशाघात—ಚಾಟೀಏಟು.

69 घनाघनैः—ಸಂತತ ಹನಿಹಾಕುವ ಮೋಡಗಳಿಂದ, वर्षुकाब्दाः घनाघनाः, ಅಮರ.

70 आप्यमिव—ಜಲಮಯವಾಗಿ, अपां समूहम्—आप्यं (ತ. ವೃ).

71 त्रिकाणि च—पृष्ठाधोभागाः, सक्थीनि च—ऊरुभागाः, शिरोधराः च ग्रीवाः, एषां समाहारः—प्राणितूर्यसेनाङ्गानां, इति—समाहारद्वन्द्वः.

72 क्रोडेन—ಕಾಲುಮಧ್ಯಭಾಗಗಳಲ್ಲಿ.

73 सप्तानां रात्रीणां—समाहारः—सप्तरात्रं, ಸಮಾಹಾರದ್ವಿಗು ಸಮಾಸ. संख्या पूर्वं रात्रं क्लीबं, 'अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः, इति समासान्तः अच्प्रत्ययः.

74 गावोऽनुगृह्यन्तां ಇದು ಕರ್ಮಾರ್ಥಕರೂಪ, गा अनुगृहाण ಕರ್ತರಿ ಪ್ರ.

75 दिवं—ಸ್ವರ್ಗವನ್ನು व ಕಾರಾನ್ತಃ ಸ್ತ್ರೀಲಿಂಗಃ ದಿವ್ ಶಬ್ದಃ.

प्रतिमानाटकम्

संख्या.

1 दग्धहृदयः—ನಿಶ್ಶೇಷವಾಗಿ ನಾಶಮಾಡಲ್ಪಟ್ಟ ಮನೋರಥಗಳುಳ್ಳವನಾಗಿ.

2 समुद्रगृहके—ಬೇಸಿಗೆಯ ತಾಪಪರಿಹಾರಕ್ಕಾಗಿ ಮಾಡಲ್ಪಟ್ಟ ಹನಿಹನಿಯಾಗಿ ನೀರೆರೆಚುವ ಯಂತ್ರಗಳುಳ್ಳ ಉದ್ಯಾನ ವಿಹಾರಗೃಹದಲ್ಲಿ. 'समुद्रगृहमित्युक्तं जलयन्त्रनिकेतनम्.'

3 महांश्चासौ उदधिश्च—महोदधिः 'आन्महत' इत्यादिना समासपूर्वपदस्य महतः 'आ' कारादेशः उदकानि धीयन्तेऽस्मिन्नित्युदधिः पेषं वासवाहनधिषु च इत्युदकशब्दस्योदादेशः.

4 महांश्चासौ राजा च महाराजः.

5 शून्यैव—स्वस्वकुशलानुकूलचेष्टामात्रविरहिता.

6 हेषा—ಕೆನೆಯುವ ಶಬ್ದ.

7 सदारसहजः,—दाराश्च सहजश्च दारसहजौ, ताभ्यां सह वर्तत इति.

8 संस्थापयन्तीभ्यां—ಶಾಂತತೆಗೆ ತರುವ.

9 उत्थाय—' उदः स्थास्तंभ्वोः पूर्वस्य इति उदः परस्य स्थाधातोः सकारस्य लोपः.

10 अनुकम्पनीयाः पुत्राः—पुत्रकाः, अनुकम्पायां कन्प्रत्ययः

11 कौसल्या माता यस्य—तस्य सम्बुद्धिः—हे कौसल्यामातः.

12 असम्बद्धेन—ಚೀರವಸ್ತ್ರಧಾರಣ, ವನವಾಸ, ಕಂದಮೂಲಫಲಾಹಾರಾದಿ ಧರ್ಮಗಳು ಪರಕೀಯವಾದುದರಿಂದ ನಿನಗೆ ಯೋಗ್ಯವಲ್ಲದು ಎಂದರ್ಥ.

13 सूर्यदिवसावसाने—ಸೂರ್ಯ, ಹಗಲುಗಳು ಮರೆಯಾದಾಗ.

14 कृतान्तहतक—ನೀಚನಾದ ಮೃತ್ಯುವೆ? (ಪರಮಘಾತುಕ ನಿಷ್ಠುರುಣನಾದುದರಿಂದೆ ಹೀಗೆ ಸಂಬೋಧಿಸಲ್ಪಟ್ಟಿದೆ).

15*a* समयावसाने—ಹದಿನಾಲ್ಕು ವರ್ಷಗಳ ಕಾಲ ವನವಾಸ ಮಾಡಬೇಕೆಂಬ ನಿಬಂಧನೆ ಪೂರೈಸಿದ ಮೇಲೆ.

15*b* सारवती—ಸುಪುತ್ರನನ್ನು ಪಡೆದವಳು.

16 शक्नोति शक्नुतः शक्नुवन्ति। इत्यादि, शक्—ಸಮರ್ಥನಾಗು 5ನೆಯ ಗಣ ವರ್ತ. ಪರ. ಪ.

17 मुषितेन्द्रियः—ಶಕ್ತಿ ಕುಗ್ಗಿದ ಇಂದ್ರಿಯಗಳುಳ್ಳವನಾದ.

संख्या.

18 नक्तं च दिवा च—नक्तन्दिवं—ರಾತ್ರಿ,ಹಗಲು. 'अचतुरे'त्यादिना निपातनात्साधुः.

19 अपि रामेण?—ರಾಮನಿಂದ ಸಹಿತನಾಗಿಯೊ? सुमन्त्रः प्रश्नः पूर्वण अन्वयः सहार्थयोगेपि तृतीया, अपि प्रश्ने.

20 समाश्वसितु श्वसितां श्वसन्तु । श्वसिहि—इत्यादि श्वस्—ಉಸಿರಾಡು 2ನೆಯ ಗಣ ಆಜ್ಞಾರ್ಥ–ಪರ. ಪ.

21*a* प्राप्नोति प्राप्नुतः प्राप्नुवन्ति इत्यादि. आप्—ಹೊಂದು 5ನೆಯ ಗಣ.

21*b* अथकिम्—ಹೌದು (ಅಹಾ).

22 धनं लब्धारः—धन्याः 'धनगणं लब्धा' इति य प्रत्ययः सुकृतिन इति भावः. रामाङ्गस्पर्शसुखानुभवित्वात् । स्वयन्त्वतथात्वाद्धन्यः इत्याशयः ಶ್ರೀರಾಮನ ದೇಹ ಸ್ಪರ್ಶದಿಂದ ಪುಣ್ಯಶಾಲಿಗಳಾದುವು ಎಂದು ವನಮಾರುತವನ್ನು ಶ್ಲಾಘಿಸಿದುದರಿಂದ ತಾನು ರಾಮಾಲಿಂಗನದ ಸುಖವಿಲ್ಲದ ಪ್ರಯುಕ್ತ ನಿರ್ಭಾಗ್ಯನೆಂದು ರಾಜನ ಪರಿತಾಪವು ವ್ಯಂಗ್ಯವಾಗುವುದು.

23 बाष्पाकुले अक्षिणी—येषान्ते—ನೀರು ತುಂಬಿದ ಕಣ್ಣುಳ್ಳವರಾಗಿ.

24 मा भाषिष्ठाः—ಮಾತನಾಡಬಾರದು. 'न माङ्योगे' इत्यडागमप्रतिषेधः, अभाषिष्ठ अभाषिषातां अभाषिषत इत्यादि.

25 सनाथा—ರಕ್ಷಣೆಯುಳ್ಳವಳಾಗಿ. अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ । आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ । इयं लोकोक्तिश्चैवं सति सुसंगता भविष्यतीति. ಅಕ್ಕಪಕ್ಕಗಳಲ್ಲೂ ಹಿಂದುಮುಂದೂ ಹೆದೆಯೇರಿಸಿ ಬಾಣವನ್ನು ಹೂಡಿದ ಬಿಲ್ಲಿನ ಹುರಿಯನ್ನು ಕಿವಿಯ ಪರ್ಯಂತವೂ ಶೆಳೆದು ಹಿಡಿದು, ಸಜ್ಜರಾದ ಶ್ರೀರಾಮ ಲಕ್ಷ್ಮಣರು ಸದಾ ಕಾಪಾಡಲಿ. ಎಂಬ ಲೋಕೋಕ್ತಿಯು ರಾಮಲಕ್ಷ್ಮಣರ ನಡುವೆ ಸೀತೆ ಇರುವ ಪಕ್ಷದಲ್ಲಿ ಬಹು ಸಮಂಜಸವಾಗುವುದು.

26 अस्तु स्तां सन्तु, एधि स्तं स्त, असानि असाव असाम अस—ಇರು 2ನೆಯ ಗಣ, ಆಜ್ಞಾರ್ಥ ಪರ. ಪ.

27 आपः—'प' ಕಾರಾನ್ತ ಸ್ತ್ರೀಲಿಂಗಃ ನಿತ್ಯ ಬಹುವಚನಾನ್ತೋऽಪ್ಶಬ್ದಃ

28 सखा—'इ' ಕಾರಾನ್ತಃ ಪುಲ್ಲಿಂಗಃ ಸಖಿಶಬ್ದಃ.

WD 4887—GBPM—1,200 Copies—25-5-44.